श्री वेङ्कटाध्वरिकृतं

श्री राघव-यादवीयम्

-काव्यम्-

"श्रीमद्राघव-यादवाकृतिधरश्शेषाचलोर्त्तंसकः
श्रेयोहेतुमचीकरत्कृतिमिमां श्रीशो मया दुष्करम् ।
तस्मादत्र पवित्रमाधवकथास्वादोन्मिषत्प्रेतुकाः
सन्तस्साधु वितन्वतां गुणविदः श्रव्याममोघादराः ॥" —THE AUTHOR.

425

7-2-67

श्रीः

श्री वेङ्कटाध्वरिकृतं

श्री राघव-यादवीयम्

(काव्यम्)

SRI RAGHAVA-YADAVEEYAM

of

SRI ARASANIPALAI VENKATADHVARI

Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya
* 594.

With a brief Introduction by

SRIMAD BHAGAVATHA RATNA, SRI BHAGAVATHA RAMAYANA
UPANYASAKA, PRAVACHANA MARGA DARSI,
BRAHMASRI
Devangudi SIVARAMAKRISHNA SASTRIGAL,
MAYURAM.

*

Copyright with the Publishers:

THE LITTLE FLOWER CO.,
8, RANGANATHAN ST.,
T.NAGAR, MADRAS-17.

First Edn. : 1966] [Price Re. 1·75

PUBLISHERS' NOTE

We proudly present this booklet entitled "**Sri Raghava - Yadaveeyam**" of *Sri Arasanipalai Venkatadhvari*. We desire to put on records our reverential thanks to Srimad Bhagavatha Rathna, Sri Bhagavatha Ramayana Upanyasaka, Pravachana Marga Darsi **Brahmasri Devangudi Sivaramakrishna Sastrigal** of Mayuram, who has, with his blessings, kindly advised us to publish the rare and unpublished manuscript which had been copied by him from old palm leaves about 70 years ago!

We consider it a rare privilege to have been entrusted with the publication of this rare work.

Our thanks are also due to the Curator of the Govt. Oriental Manuscripts Library, Madras, for kindly permitting us to scrutinise the present manuscript with those available in the Library. We thank Madhwa Sastra Sampanna Sri Panduranga Rao, Ayachitam, for his assistance in rendering the English translation of the work.

We salute **Sri Rama** and **Sri Krishna** the two Gods represented in this booklet and pray to **Lord Sri Venkateswara,** the Lord of the Seven Hills, to bless the humanity as a whole and give the lovers of that ornate and divine language - Samskrit, unflinching faith in Divine Grace.

THE LITTLE FLOWER CO.,

Madras-17, 25-9-1966. "THE LITTLE FLOWER CO." *Publishers.*

ஸ்ரீ:

ஸ்ரீராமஜயம்

அணிந்துரை

ஆஸ்திகர்களான மஹான்களுக்கு ஒரு விக்ஞாபனம். இந்த **'ஸ்ரீராகவ-யாதவீயம்'** என்கிற சிறிய காவியம், ஸர்வ சாஸ்திர பாரங்கதர்களாயும், ஸதாசார ஸம்பந்நர்களாயும், விசுவ குணதர்சம், உத்தரசம்பு, லக்ஷ்மீ ஸஹஸ்ரம் முதலிய அநேக கிரந்தங்களைச் செய்தவர்களாயும், மஹாகவியாயும், ஸ்ரீ தீக்ஷித வம்சத்தில் ஜனித்தவர்களாயும், அரசாணிபாலை என்கிற கிராமத்தில் ஜனித்தவர்களாயும், பிறகு காஞ்சீபுரத்தில் வசித்தவர்களுமான ஸ்ரீ வேங்கடாத்வரி என்கிற மகானால் செய்யப்பட்டது.

இதற்குப் பிரமாணம், இந்த கிரந்தத்தில் கடைசியில் பூர்த்தி செய்யும்போது, "ஸ்ரீநிவாஸ தீக்ஷிதர் பௌத்ரனும் ரகுநாத தீக்ஷிதர் புத்திரனுமான வேங்கடாத்வரியால் செய்யப்பட்டது" என்று எழுதியிருக்கிறதே.

ஆனால் **"விசுவ குணதர்சம்"** உத்தரசம்புகளில் அப்பய்ய குரு பௌத்ரன் என்றும் கவியால் எழுதப்பட்டிருக்கிறது. இருந்தாலும், இந்தக் கவியின் பிதாமஹர் அப்பய்ய குருவென்று லோக வியவகாரத்தில் பெயர் இருந்தாலும் நாமகரண நாமாவில் ஸ்ரீநிவாஸ தீக்ஷிதர் என்று பெயர் இருக்குமென்று என் எண்ணம். இந்த கிரந்தத்தை எழுதிவைத்திருந்து கொடுத்த பெரியோர்களெல்லாம் அரசாணிபாலை ஸ்ரீ வேங்கடாத்வரி செய்ததென்று சொன்ன ஐதிஹ்யமும் பிரமாணம்.

இந்த புத்தகம் எனக்குக் காவிய குருக்களாயும், தேவங்குடி கிராமவாசியாயும், கிராமத்தில் எல்லோருக்கும் பகவத் பக்தியை உண்டு பண்ணியவர்களுமான ஸ்ரீ ராமஸ்வாமி சாஸ்திரிகள் அவர்களிடம் இருந்தது. அவர்கள் ஒரு பெரியவர்களிடமிருந்து ஓலையில் எழுதிவைத்திருந்தார்கள். அதை நான் என்னுடைய 14-வது வயதில் ஓலையில் எழுத்தாணியால் எழுதிவைத்துக்கொண்டேன்.

பிறகு 30 வருஷத்திற்குப் பிறகு ஓலைச்சுவடி ஜீரணமாய் விட்டதால் கடிதத்தில் பேனாவினால் எழுதி புதுப்பித்து வைத்தேன். எதற்கும் பகவதாநுகூல்யம் வேணுமாதலால் இப்போதான் பகவத்ஸங்கல்பத்தால் எனக்கு அத்யந்தம் ஆப்தர்களான லிப்கோ

புஸ்தக ஸ்தாபனத்தார் அச்சுப் போடுவதாக அங்கீகரித்து அச்சுப் போட்டு வெளியிட்டிருக்கிறார்கள். அவர்கள் உதாரமான மனசு உள்ளவர்கள். ஆனதால் லோகோபகாரமாகவே பெரியோர்கள் கிரந்தம் வெளிவர வேண்டுமென்கிற தர்மபுத்தியால் இதைச் செய்திருக்கிறார்கள்.

சுலோகத்தை அநுலோமமாய்ப் படித்தால் ஸ்ரீராம சரித்திரமும் பிரதிலோமமாகப் படித்தால் ஸ்ரீ கிருஷ்ண சரித்திரத்தில் ஸ்ரீ பாரிஜாதாபஹரண லீலையும் பிரகாசிக்கும்படி மஹா கவியானதால் செய்திருக்கிறார்கள்.

இப்படிச் செய்வது எல்லோருக்கும் சுலபமில்லை. சுலோகம் 30, அநுலோமப் பிரதிலோமத்தால் 60 ஆச்சுது. ஒவ்வொரு சுலோகத்திற்கும் பதம் பிரித்து அர்த்தத்தையும் ஸ்பஷ்டமாக இந்தக் கவியே எழுதியிருக்கிறார். ஆகையால் சுலபமாக எல்லோரும் படிக்கலாம். இந்த 30 சுலோக பாராயணத்தால் ஸ்ரீ ராம சரித்திரம், ஸ்ரீ கிருஷ்ண சரித்திரம் இரண்டையும் பாராயணம் செய்த சுகிருதம் ஏற்படுமானதால் ஆஸ்திகர்கள் எல்லோரும் இந்தக் கிரந்தத்தை வாங்கிப் படித்து சிரேயஸை அடையவேணுமென்று என் பிரார்த்தனை. திருஷ்டமான தனப் பிரயோஜனத்தை மாத்திரம் எதிர்பாராமல் தர்மத்தை முக்கியமாக வைத்துக் கொண்டு லோகோபகாரமாக அனேகம் கிரந்தங்களைப் பிரசுரம் செய்து வருகிறவர்களும் இந்தக் கிரந்தத்தையும் அந்தவிதமே அச்சுப் போட்டு வெளியிட்டவர்களுமான **லிப்கோ புஸ்தக ஸ்தாபனத்தார்**, அதைச் சேர்ந்தவர்கள் எல்லோருக்கும் என்னுடைய கிருதக்ஞதையையும் ஆசீர்வாதத்தையும் தெரிவித்துக்கொள்கிறேன்.

இந்த லிப்கோ புஸ்தக ஸ்தாபனமானது இந்தவிதமே அநேக கிரந்தங்களை வெளிப்படுத்திக்கொண்டு எந்தவிதமான விக்னமும் ஏற்படாமல் மேன்மேல் விருத்தியாகும்படி ஸர்வேசுவரனைப் பிரார்த்திக்கிறேன்.

மாயூரம்,
26-7-1966.

சிவராமகிருஷ்ண சாஸ்திரி.

ஸர்வம் ஸ்ரீ க்ருஷ்ணார்ப்பணமஸ்து.

EDITOR'S PREFACE

To the lovers of Sanskrit this is a rare but an invaluable booklet.

The author of the work is popularly known as Sri Arasanipalai Venkatacharya. He was born at Arasanipalai near Kancheepuram. His parents were Raghunatha and Sitamba of Atreya Gotra. His grand-father (Srinivasa) was known as Appayaguru and the nephew of the great Panchamata Bhanjana Tatacharya of Kancheepuram.

Sri Venkatadhvari - the appellate Adhvari denoting the sacrifical associations - was a staunch follower of Sri Vedanta Desika and lived in the latter half of the 17th century. His literary activity discloses his versatility as a master of poetry, rhetorics and dramaturgy. He was stated to have been for sometime the chief pandit at the court of '**Pralayakaveri**'. Fourteen works are attributed to his authorship. The foremost among them is the famous '**Visvagunadarsa Champu**', a proso-poetic composition, intended to expose the faults of the manners and customs of his time. The narration is made by two Gandharvas - Visvasu and Krisanu who take a bird's eye view of the countries in their aerial car. The former is generous in his appreciation of merits while the latter is always critical. As a consequence of such a censure of the world around, it is said that the author lost his sight and the same was restored when he praised in thousand verses Goddess Lakshmi. The work is

entitled **'Lakshmisahasram'**. This work displays the excellent verbal ingenuity and poetic imagery of the poet.

The booklet **'Raghava Yadaveeyam'** treats the stories of Ramayana and Bhagavatha together. It consists of 30 stanzas. In one Manuscript at the Govt. Oriental Manuscripts Library, the work was found to contain 32 slokas while another manuscript refers to the work under print as forming the first part of a composite work. A comparison of the palm leaves manuscript (bearing No. R. 135) with the manuscript made available for publication reveals that the following verses which occur at the beginning and the end of the 'Kavya' are not found in the manuscript made available.

1. किञ्चित्सञ्चिन्तयोगोपीकिलकिञ्चितवञ्चितम् ।
   अञ्चितं ज्योतिरमरैरञ्जनाद्रावुदञ्चितम् ॥
2. भद्रोल्लासंभास्करापत्यवाहि न्यन्तर्दीव्यन्नस्तवैर्युग्रबाणः ।
   नाथोऽहल्यानन्दहेतुः प्रदत्तां राजीवाक्षो राघवो यादवो वा ॥
3. अनुवर्णितरामकृष्णवृत्तेरनुलोमप्रतिलोमवाचनाभ्याम् ।
   कृतिमुल्लसितां विधाय पद्यैः विवृणोति स्वयमेव वेङ्कटार्यः ॥

महीसुता सुहृत्त्वेन ख्यातौ सत्यानुसारिणौ ।
दीव्येतां हृदये नित्यं देवौ राघवयादवौ ॥

इति श्रीमद्वाजपेयसर्वप्रतिष्ठाप्तोर्यामादियाजि श्रीनिवासाचार्य-
नन्दन रघुनाथाचार्यदीक्षित तनयस्य श्रीमत्काञ्चीपुरवसतेः
आत्रेयवेङ्कटाचार्य यज्वनः कृतिषु राघवयादवीयचरिताख्ये
दुष्करकाव्ये प्रथमभागः ॥

The sloka at the beginning deals respectively with the praise of Lord Sri Srinivasa, the presiding Deity at Tirupati, Lords Sri Raghava and Sri Krishna and the last describes the mode of composition of the work and the author.

The sloka inserted at the end invokes the blessings of Sri Rama and Sri Krishna and the prose that follows gives a brief description of his immediate ancestors (parents and grand-parents.). It further connotes the difficult nature of the composition 'Dushkara Kavyam'. The work, whose language is terse and bristles with alliterations of an advanced type, relates the entire story of Rama and of Krishna's adventure in bringing the celestial tree Parijatha to the earth, at a time, in the natural and reverse order. Though the work is said to consist of 30 Slokas, the composition actually consists of 60 Slokas, the first narrating the story of Ramayana while the following, which adopts the letters in the first stanza in the reverse order, describes the story of Parijatha-apaharana. The speciality in the work lies in its conception and mode of execution. While many works in Sanskrit, have been produced to depict two heroes, the means employed were to press into service the slesha (the double entendre) i.e., words giving two meanings. In "Raghava Yadaveeyam" of Sri Venkatadhvari, the process is manifestly different in that the very letters that constitute a verse to depict the story of Rama is reversed in its entirety to portray the deeds of Sri Krishna.

While the story delineated in this composition (relating to Rama) is true to the trend in the Valmiki Ramayana, the story connected with Sri Krishna's adventure makes a deviation from the narrative found in the Bhagavatha. In His journey to the abode of the Gods, Sri Krishna is said to be accompanied by Satyabhama in the Bhagavatha while in this work, Pradyumna is shown to have followed Sri Krishna.

The style of the composition is rather extremely difficult to be understood without the commentary, which the author himself has provided. The ornate style of the slokas shows the great verbal ingenuity and the skilful manner in which the words have been employed.

The originality of the attempt of the author. in introducing a rare manner of composition, predicates the propensity of the poet in the author, to display his mastery of grammar.

The rarity of the manuscript has rendered the publication a prime necessity and if the author comes to be better appreciated, our labours will be considered to have been amply repaid.

Prostrations to Lord Sri Venkateswara.

In the service of knowledge,

K. SRINIVASACHARI, P.O.L.,
Nyaya Siromani and Visarad,
Honorary Editor, The 'LIFCO' Publishers.

॥ श्रीरामजयम् ॥

श्री वेङ्कटाध्वरिकृतं

श्री राघव-यादवीयम्

(काव्यम्)

वंदेऽहं देवं तं श्रीतं रन्तारं कालं भासा यः ।
रामो रामाधीराप्यागो लीलामारायोध्ये वासे ॥ १ ॥

पदच्छेदः

वन्दे अहं देवं तं श्रीतं रन्तारं कालं भासा यः ।
रामः रामाधीः आप्यागः लीलां आर आयोध्ये वासे ॥

रामाधीः रामायां स्त्रियां सीतायां धीः बुद्धिः यस्य स तथोक्तः सन् । आप्यागः आप्तुं योग्याः अगाः सह्यमलयादिपर्वताः यस्य स तथोक्तः । सीतायां मनः प्रणिधाय सह्यमलयादिगिरीन् गतवान् इति भावः । एवंविधः यः रामः आयोध्ये अयोध्याभवे वासे गृहे लीलां क्रीडां आर प्राप्तवानिति भावः । "ऋ गतौ" इत्यस्माल्लिट् । रावणवधं कृत्वा अयोध्यायां स्वगेहमेत्य सीतया साकं चिक्रीडेत्यर्थः । भासा कान्त्या कालं रन्तारं क्रीडितारं इति यावत् । श्रिया इतं प्राप्तं श्रीतं "गोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिति कथ्यते" इति नैघण्टुकाः । तं देवं अहं वन्दे प्रणमामीत्यर्थः ॥

अयमेव श्लोकः प्रातिलोम्येन पठ्यते—

सेवाध्येयो रामालाली गोप्याराधी मारामोराः ।
यस्साभालंकारं तारं तं श्रीतं वन्देऽहं देवम् ॥

पदच्छेदः

सेवाध्येयः रामालाली गोप्याराधी मारामोराः ।
यः साभालंकारं तारं तं श्रीतं वन्दे अहं देवम् ॥

मारामोराः मायाः लक्ष्म्याः आरामभूतं भोग्यस्थानभूतं उरः वक्षः यस्य स तथोक्तः । अत एव "समस्तलोक विजयश्री-पूर्यमाणोरसम्" इति मुरारिप्रयोगः । सेवाध्येयः सेवादिभिः तपोयज्ञादिभिः ध्येयः ध्यातुं योग्यः । रामालाली रामाः रुक्मिण्यादिकाः अष्टौ महिष्यः ताः लालयतीति तथोक्तः यः कृष्णः गोप्याराधी गोप्यः राधाप्रभृतयः गोपाङ्गनाः आराधयति संमानयतीति गोप्याराधी अभूदिति शेषः । अनेन कृष्णस्य दक्षिणत्वमुक्तं भवति । साभालंकारं साभाः सदीप्तिकाः अलंकाराः कौस्तुभादिभूषणानि यस्य स तथोक्तः । तं श्रीतं पूर्ववदर्थः । तं देवं वासुदेवं अहं तारं यथा भवति तथा उच्चस्वरेणेति यावत् । वन्दे स्तौमि । वदि स्तुत्यभिवादनयोः इत्यस्मात् लङुत्तमैकवचनम् ॥ १ ॥

अथ आनुलोम्यप्रातिलोम्याभ्यां अयोध्यापुर द्वारकापुर वर्णनपरं श्लोकमारचयति—

साकेताख्या ज्यायामासीद्याविप्रादीप्तार्याधारा ।
पूराजीतादेवाद्याविश्वासाग्र्यासावाशारावा ॥ २ ॥

पदच्छेदः

साकेताख्या ज्यायां आसीत् या विप्रादीप्ता आर्याधारा ।
पूः आजीता अदेवाद्याविश्वासा अग्र्या सावाशारावा ॥

अजस्य अपत्यं आजिः दशरथः तेन इता प्राप्ता आजीता । अदेवाद्याविश्वासा देवाद्याः देवगन्धर्वदानवाद्याः तेषां अविश्वासः देवाद्याविश्वासः तद्रहिता अदेवाद्याविश्वासा । देवादयः इमां पुरीं उपरुन्ध्युरिति अविश्वासः तस्याः कदापि नास्तीति भावः । देवादीनामपि दुस्साध्येति भावः । अग्र्या अग्रभवा अयोध्यामथुरामायेत्यादि सप्तपुरीषु मध्ये प्रथमगणितेति यावत् । श्रेष्ठेति वा अर्थः । सावाशारावा सवं यज्ञं अश्नन्तीति सवाशाः क्रतुभुजः, तत्संबन्धी सावाशः आरावः कोलाहलः यस्याः सा तथोक्ता । तस्यां क्रतूनां अनुष्ठीयमानतया तदीयहविर्जिघृक्षया समागतदेवकोलाहलशालिनी सेत्यर्थः । "यज्ञः सवोऽध्वरो यागः" इत्यमरः । आर्याः वैश्याः आधाराः अपेक्षितवस्तुप्रदानेन आश्रयभूताः यस्याः सा तथोक्ता । "स्यादार्यः स्वामिवैश्ययोः" इति अनुशासनम् । एवंविधा साकेताख्या साकेतमिति नामवती पूः पुरी अयोध्यापुरी "स्यात्साकेतमयोध्यायां" इत्यमरः । ज्यायां भूम्यां "क्षोणीज्याकाश्यपी क्षितिः" इत्यमरः ।

आसीत् अभूत्। या पूः विप्रैः ब्राह्मणैः आदीप्ता आ समन्तात् प्रकाशिता सा पूः आसीदित्यन्वयः ॥

अयमेव श्लोकः प्रातिलोम्येन पठ्यते—

वाराशावासाग्र्या साश्वाविद्यावादेताजीरापूः ।
राधार्याप्ता दीप्राविद्यासीमायाज्याख्याताकेसा ॥

पदच्छेदः

वाराशौ आस अग्र्या साश्वा विद्यावादेताजीरा पूः ।
राधार्याप्ता दीप्रा विद्यासीमा या ज्याख्याता के सा ॥

अग्र्या उत्तमा "पुरी द्वारवती चैव" इति द्वारकाया अन्त्यत्वात्। साश्वा अश्वसहिता अश्वशब्दो गजादीनामुपलक्षकः। विद्यावादेषु तर्कादिविद्याप्रसंगेषु इताजयः प्राप्तयुद्धाः पण्डिताः तेषां इरा भूमिः स्थानमिति यावत्। "इरावारिसुराभूम्यां भारतीषु निगद्यते" इति हलायुधः। राधार्याप्ता राधायाः आर्यः राधार्यः राधास्वामी राधाभर्ता कृष्णः तं आप्ता प्राप्ता। दीप्रा प्रकाशमाना विद्यासीमा विद्यानां दहरविद्यादि ब्रह्मविद्यानां सीमा सिद्धिक्षेत्रभूता, सर्वथा भगवत्सन्निधानादिति भावः। एवंविधा या पूः द्वारकापुरी ज्याख्याता भूमौ प्रसिद्धा सा वाराशौ जलराशौ के जले आस बभूव ॥ २ ॥

अनयोरेव पुर्योः आनुलोम्यप्रातिलोम्याभ्यां वर्णयितारं श्लोकं आरचयति—

कामभास्स्थलसारश्रीसौधासौघनवापिका ।
सारसारवपीनासरागाकारसुभूरिभूः ॥ ३ ॥

पदच्छेदः

कामभास्स्थलसारश्रीसौधा असौ घनवापिका ।
सारसारवपीना सरागाकारसुभूरिभूः ॥

कामस्य भाः मन्मथस्य तेजः तस्य स्थलभूताः स्थानभूताः मन्मथोद्दीपिका इति यावत् । सारश्रियः वरेण्यसंपदः सौधाः यस्यां सा तथोक्ता । घनवापिका निबिडवापिका । सारसारवपीना सारसानां पक्षिविशेषाणां आरवैः शब्दैः पीना अधिका असौ साकेताख्या पुरी सरागाकारसुभूरिभूः सरागः सरक्तिमा आकारः येषां तानि सरागाकाराणि रक्तवर्णानि सुभूरीणि शोभनवर्णानि तेषां भूः स्थानभूता । "भूरिप्राज्यसुवर्णयोः" "भूः पृथ्व्यां स्थानमात्रे" इति विश्वः । सरागाकाराः सुभूरिभुवः यस्याः सा तथोक्तेति वा अर्थः ॥

अयमेव श्लोकः प्रातिलोम्येन पठ्यते—

भूरिभूसुरकागारासनापीवरसारसा ।
कापिवानघसौधासौ श्रीरसालस्थभामका ॥

पदच्छेदः

भूरिभूसुरकागारासना पीवरसारसा ।
का अपि वा अनघसौधा असौ श्रीरसालस्थभामका ॥

भूरिभूसुरकानि बहुब्राह्मणकानि अगारासनानि गृहवेदिकाः यस्यां सा तथोक्ता। गृहवेदिकापंक्तिः बहुब्राह्मणेत्यर्थः। पीवराणि स्थूलानि सारसानि पद्मानि यस्यां सा तथोक्ता। "सारसः पक्षिभेदे स्यात् सारसं सरसीरुहम्" इति विश्वः। अनघसौधा निर्दोषप्रासादा। वाशब्दः समुच्चये। अनघसौधा चेत्यर्थः। "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इत्यभिधानात्। काऽपि अनिर्वाच्या असौ द्वारकापुरी श्रीरसालस्थभामका श्रीमत्सु रसालेषु सहकारेषु तिष्ठतीति श्रीरसालस्थः। भामः सूर्यः स एव भामकः यस्यां सा तथोक्ता। रसालाग्रस्थसूर्य इत्यनेन रसालानां अत्यौन्नत्यं भवति। अत एव संबन्धातिशयोक्तिरलंकारः। "भामः क्रोधे रवौ दीप्तौ" इति विश्वः॥ ३॥

एवं पुरद्वयं वर्णयित्वा तन्नायकौ रामकृष्णौ आनुलोम्यप्रातिलोम्याभ्यां प्रतिपादयितृपद्यं रचयति—

रामधामसमानेनमागोरोधनमासताम्।
नामहामक्षररसं ताराभास्तु न वेद या॥ ४॥

पदच्छेदः

रामधाम समानेनं आगोरोधनं आस तां।
नामहां अक्षररसं ताराभाः तु न वेद या॥

या पुरी ताराभाः नक्षत्रकान्त्यः न वेद न जानाति। ताराशब्दः सूर्यादेरुपलक्षणार्थः। सूर्यचन्द्रनक्षत्रादीन् रश्मीन् उपवन-

सौधादिनिबिडतया न जानातीत्यर्थः। तां अयोध्यापुरीं नामहां अमहः अनुत्सवः न विद्यते यस्यां सा नामहा। नैकधेत्यादाविव प्रतिषेधार्थ-नकारसमासः। अतः न नलोपः। सर्वदा महोत्सवशालिनीमित्यर्थः। अक्षररसं नित्यानन्दं। आगोरोधनं पापनिवारकं। "आगः पापा-पराधयोः" इति विश्वः। समानेनं समानः सदृशः इनः सूर्यः यस्य तत् तथोक्तं। सूर्यसदृशमित्यर्थः। रामधाम रामाख्यं धाम तेजः आस तां पुरीं आददे परिजग्राहेत्यर्थः॥

इदमेव पद्यं प्रातिलोम्येन पठ्यते—

यादवेनस्तुभारातासंररक्षमहामनाः।
तां समानधरोगोमाननेमासमधामराः॥

पदच्छेदः

यादवेनः तु भाराता संररक्ष महामनाः।
तां सः मानधरः गोमान् अनेमासमधामराः॥

नेमः अवधिः न विद्यते ययोः ते अनेमे असमे निरुपमे धामरायौ तेजस्संपदौ यस्य सः अनेमासमधामराः निरवधिकनिस्सीम-तेजस्संपद्युक्त इत्यर्थः। "नेमः कालेऽवधौ गर्ते प्रकारे कैतवेपि चे" ति विश्वः। गोमान् गोस्वामी तु गोमानित्युक्तेः। गोपाल इति यावत्। मानधरः मानी महामनाः उदारचेताः भाराता भासां दीप्तीनां राता दाता। रा दान इत्यस्मात् तृचि रूपम्। सः प्रसिद्धः यादवेनः यादवानां इनः प्रभुः श्रीकृष्णः "इनस्सूर्ये प्रभौ चन्द्र" इत्युक्तेः।

स तु तां द्वारकापुरीं संररक्ष पालयामास। "रक्ष पालन" इत्यस्मात् संपूर्वात् लिट् ॥ ४ ॥

अथ विश्वामित्रागमनं रामकृततद्यज्ञरक्षणं च आनुलोम्येन प्रतिपादयन्तं, प्रातिलोम्येन च नारदस्य कृष्णप्राप्तिप्रतिपादकं श्लोकं ग्रथ्नाति—

यन् गाधेयो योगी रागी वैताने सौम्ये सौख्येसौ।
तं ख्यातं शीतं स्फीतं भीमानामाश्रीहाता त्रातम् ॥ ५ ॥

पदच्छेदः

यन् गाधेयः योगी रागी वैताने सौम्ये सौख्ये असौ।
तं ख्यातं शीतं स्फीतं भीमान् आम अश्रीहाता त्रातम् ॥

सौम्ये सुन्दरे वैताने वितानः यज्ञः तत्संबन्धिनि सौख्ये सुखे, रागी इच्छावान्। अतिसुन्दरयज्ञजन्यसुखेच्छावानित्यर्थः। अत एव अश्रीहाता श्रीः वेदः "सा हि श्रीरमृता सतां" इति श्रुतेः। तद्विरोधिनः अश्रियः अवैदिकाः तेषां हाता वर्जयिता भीमान् भययुक्तः। राक्षसाः आगत्य स्वयज्ञविघ्नं करिष्यन्तीति भीतिमानित्यर्थः। एवंविधः गाधेयः योगी विश्वामित्रमुनिः स्फीतं अभिवृद्धं शीतं अनुग्रं ख्यातं कीर्तिमन्तं तं श्रीरामचन्द्रं यन् प्राप्नुवन् सन्। "इण् गतौ" इत्यस्मात् शतरि रूपम्। असौ गाधिपुत्रः त्रातं भावे क्तः। त्राणं प्रकृतत्वात् त्राणं यज्ञरक्षणं आम प्राप्तवान्। "आम गत्यादिषु"

इत्यस्मात् लिट्। यज्ञं चिकीर्षन् विश्वामित्रः श्रीरामं प्राप्य स्वयज्ञरक्षणं प्राप्तवानिति भावः ॥

प्रातिलोम्येन तु एवं पाठः—

तं त्राताहाश्रीमानामाभीतं स्फीतं शीतं ख्यातं ।
सौख्ये सौम्येसौ नेता वै गीरागीयो योधेगायन् ॥

पदच्छेदः

तं त्राता हा श्रीमान् आम अभीतं स्फीतं शीतं ख्यातं ।
सौख्ये सौम्ये असौ नेता वै गीरागी यः योधे गायन् ॥

सौम्ये जातावेकवचनम्। सौम्येषु विप्रेषु । "सौम्यः पुमान् बुधे विप्रे त्रिषु स्यात् सोमदैवते। रम्ये अनुग्रहे चे" ति रत्नमाला। तेषु मध्ये नेता नायकः। ब्राह्मणेषु उत्तम इत्यर्थः। योधे योद्धरि। "भटा योधाश्च योद्धारः" इत्यमरः। तस्मिन् अभीतं अभीतिं भावे क्तः। त्राता रक्षिता। योद्धृनिष्ठस्य भयाभावस्य धैर्यातिशयोत्पादनेन संरक्षक इत्यर्थः। श्रीमान् शोभावान् ब्रह्मवर्चसीति यावत्। यः मुनिः। गीरागी गिरां वाचां रागाः गान्धारादिस्वराः अस्य सन्तीति गीरागी। "रागोनुरागे मात्सर्ये लाक्षादौ रक्तिमत्विषोः। गान्धारादौ रंजने च" इति रत्नमाला। असौ नारदः गायन् गानं कुर्वन् शीतं दयाशीतलं ख्यातं प्रसिद्धं सौख्ये स्फीतं जगतः सुखार्थं अभिवृद्धं। सौख्ये इति निमित्ते सप्तमी। चर्मणि द्वीपिनं हन्तीतिवत्। तं श्रीकृष्णं आम प्राप्तवान्। हेति सत्यभामाकोपमूलमिदं नारदागमनमिति खेदं

सूचयति। वै शब्दः पादपूरणे। "वै स्यात् संबोधने पाद-पूरणेऽनुनयेपि च" इति (रत्नमाला) विश्वः। यद्वा सौम्ये नेतावै नेतृत्वेन प्रसिद्ध इत्यर्थः। "वै संबुद्धावनुनये तथारंभप्रसिद्धयोः" इति रत्नमाला। अत्र योधोत्साहजनकत्व गानकर्तृत्वादि विशेषणैः नारद इति व्यज्यते। अत एव पर्यायोक्तमलंकारः॥ ५॥

अथ आनुलोम्येन सीतायाः रामप्राप्तिप्रतिपादकं, प्रातिलोम्येन रुक्मिण्याः पारिजातकुसुमलाभप्रतिपादकं च पद्यं निबध्नाति—

मारमं सुकुमाराभं रसाजापनृताश्रितं।
काविरामदलापागोसमावामतरानते॥ ६॥

पदच्छेदः

मारमं सुकुमाराभं रसाजा आप नृताश्रितं।
काविरामदलापा गोसमा अवामतरा नते॥

कस्य सुखस्य अविरामः अविच्छेदः तं ददातीति काविरामदः। लापः अभिलापः यस्याः सा काविरामदलापा। अविच्छिन्नानन्दप्रद-सूक्तिकेत्यर्थः। "कं शिरोम्बुसुखेपि च" इति रत्नमाला। कं ब्रह्म खं ब्रह्मेति च श्रुतिः। गोसमा क्षमायाः भूमेः मातुस्समा। अत एव नते प्रणतजने अवामतरा सुतरां अकुटिला रसाजा भूमिजा सीता "रसाविश्वंभरास्थिरे" त्यमरः। सुकुमाराभं कोमलप्रभं नृतां नरभावं आश्रितं मारमं लक्ष्मीकान्तं "मः शिवे मा रमायां

स्यात्" इति विश्वः। "रमः कान्तो रमा लक्ष्म्यां" इति रत्नमाला। आप प्राप्तवती। अनेन वैदेहीरघुवीरयोः विवाहोत्सवः प्रदर्शितः।

प्रातिलोम्येन चैवमस्य पाठः—

तेन रातमवामास गोपालादमराविका।
तं श्रितानृपजासारभं रामाकुसुमं रमा॥

पदच्छेदः

तेन रातं अवामा आस गोपालात् अमराविका।
तं श्रिता नृपजा सारभं रामा कुसुमं रमा॥

रमा लक्ष्मीरेव नृपजा सती राज्ञः जाता सती तं श्रीकृष्णं श्रिता प्राप्ता। अमराविका अमराणां अविका रक्षिका। अव रक्षण इत्यस्मात् ण्वुल्। अवामा कौटिल्यरहिता रामा वधूः रुक्मिणीति यावत्। "राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि" इति स्मर्यते। तेन नारदेन रातं दत्तं। रा दान इत्यस्मात् कर्मणि क्तः। साराभं सारा मुख्या भा कान्तिः यस्य तत्। "भाश्च विद्युति दीप्तयः" इत्यमरः। कुसुमं पारिजातपुष्पं गोपालात् कृष्णात् आस गृहीतवतीत्यर्थः॥ ६॥

अथ आनुलोम्येन रामो जामदग्न्यं जित्वा तस्मिन् आनते सति दयां कृतवान्। एतं अर्थं प्रदर्शयन्तं, प्रातिलोम्येन च भौमेषु कुसुमेषु

कृतानादरा रुक्मिणीधृतेन पारिजातकुसुमेन शोभातिशयं प्राप्य नवैव जातेति प्रत्याययन्तं श्लोकं आरचयति—

रामनामा सदा खेदभावे दया-
वानतापीनतेजारिपावानते ।
कादिमोदासहातास्वभासारसा-
मेसुगोरेणुकागात्रजे भूरुमे ॥ ७ ॥

पदच्छेदः

रामनामा सदा खेदभावे दयावान् अतापी इनतेजाः रिपौ आनते ।
कादिमोदासहाता स्वभासा रसामे सुगः रेणुकागात्रजे भूरुमे ॥

कादिमोदासहाता कं जलं अदन्तीति कादिनः अब्भक्षाः मुनयः तेषां मोदं अस्यन्ति तिरस्यन्तीति कादिमोदासाः महर्षिहर्षनिरासकाः राक्षसाः तेषां हाता वर्जयिता निराकर्तेति यावत् । खेदः भावे यस्य सः खेदभावः खेदभावे खिन्नमनस्के सदा दयावान् कृपाशाली इनतेजाः सूर्यप्रकाशः तथापि सुगः सुप्रापः रामनामा भगवान् भूरुमे भुवः उरुः अधिकः मा लक्ष्मीः यस्य सः भूरुमः पृथिवीसंपन्नविपुल-श्रीकः इत्यर्थः । रसामे रसां अमति गच्छतीति रसामः भुवं त्यक्त्वापि तां पुनः प्राप्तवतीत्यर्थः । रिपौ शत्रुभूते रेणुकागात्रजे रेणुका-पुत्रे जामदग्न्ये रामे आनते प्रणते सति स्वभासा स्वतेजसा अतापी अतापनः बभूवेत्यर्थः ॥

प्रातिलोम्येन त्वेवं पाठः—

मेरुभूजेत्रगाकाणुरेगोसुमे-
सारसा भास्वताहासदामोदिका ।
तेन वा पारिजातेन पीता नवा
यादवे भादखेदासमानामरा ॥

पदच्छेदः

मेरुभूजेत्रगा काणुरे गोसुमे सा अरसा भास्वता हा सदामोदिका ।
तेन वा पारिजातेन पीता नवा यादवे अभात् अखेदा समानामरा ॥

मेरुभूजेत्रगा मेरुप्रदेशजेता अगः रैवताख्यः पर्वतः यस्याः सा तथोक्ता । सुमेरुसमे रैवतके हि नारदेनागत्य रुक्मिण्या सह स्थिताय कृष्णाय पारिजातकुसुमं दत्तमिति पुराणप्रसिद्धिः । कस्य सुखस्य अणुः काणुः सुखलेशः तं राति ददातीति काणुरं सुखलेशप्रदं तस्मिन् । "लवलेशतृणाणवः" इत्यमरः । राते रातोऽनुपसर्गे कः । गोसुमे भूमिजन्ये पुष्पे अरसा रसः रागः तद्रहिता अरसा । दिव्यकुसुमलाभेन भौमकुसुमेषु निःस्पृहेति भावः । सदामोदिका सततं आमोदिका सन्तोषयित्री समानामरा पारिजातलाभादमरसदृशीत्यर्थः । अखेदा दुःखरहिता भास्वता तेजस्विना तेन पारिजातेन कृष्णदत्तेन पारिजात-कुसुमेन पीता गौरवर्णा सा रुक्मिणी नवेव नूतनेव शोभातिशयेन नवदेहं प्राप्तेव यादवे श्रीकृष्णे अभात् प्रचकाशे । अत्र वाशब्दः इवार्थः । "इववद्वायथाशब्दौ" इति दण्डी । हा इत्याश्चर्ये । पारिजात-

कुसुमेन शोभातिशयं प्राप्य रुक्मिणी कृष्णसमीपे गृहीतमानुषदेहापि दिव्यशरीरं प्राप्तेव बभौ इति भावः ॥ ७ ॥

अथ रामः साकेतं प्राप्य स्वगेहेषु सीतया साकं अरमतेत्येवं आनुलोम्येन प्रतिपादयन्तं, प्रातिलोम्येन कृष्णदत्तपारिजातभूषिता रुक्मिणी कृष्णेन सह स्वगेहं प्रापेत्येवमर्थं प्रत्याययन्तं श्लोकमाह—

सारसासमधाताक्षिभूम्नाधामसु सीतया ।
साध्वसाविहरेमेक्षेम्यरमासुरसारहा ॥ ८ ॥

पदच्छेदः

सारसासमधाता अक्षिभूम्ना धामसु सीतया ।
साधु असौ इह रेमे क्षेमी अरं आसुरसारहा ॥

अरं शीघ्रं आसुरं असुरसंबन्धिनं सारं बलं हन्तीति आसुर-सारहा क्षेमी कुशलवान् अक्षिभूम्ना नेत्रमहिम्ना सारसासमधाता असमशब्दः भावप्रधानः असमत्वं असाधुत्वं। "समा स्त्रीवत्सरे साधु सर्वतुल्येषु त्रिष्वपी" ति रत्नमाला। सारसेषु पद्मेषु असमत्वस्य असाधुत्वस्य धाता पोषकः पद्मासाधुत्वावहनयनप्रभावः इत्यर्थः। असौ श्रीरामः इह अयोध्यायां धामसु गृहेषु सीतया जानक्या सह साधु सम्यक् रेमे रमते स्म ॥

प्रातिलोम्येन पाठस्तु एवम्—

हारसारसुमारम्यक्षेमेरेहविसाध्वसा ।
यातसीसुमधाम्नाभूक्षिताधामससारसा ॥

पदच्छेदः

हारसारसुमा रम्यक्षेमेरा इह विसाध्वसा ।
या अतसीसुमधाम्ना भूक्षिता धाम ससार सा ॥

हार इव मुक्तावलिरिव सारं श्रेष्ठं सुमं पारिजातकुसुमं यस्यास्सा हारसारसुमा रम्यस्य मनोज्ञस्य क्षेमस्य कल्याणस्य इरा भूमिः स्थानमिति यावत् । या रुक्मिणी इह जगति विसाध्वसा भयरहिता सपत्नीभ्यः सत्यभामादिभ्यः अपि नाबिभ्यदित्यर्थः । सा रुक्मिणी अतसीसुमधाम्ना अतसीपुष्पदीप्तिना भूक्षिता पृथिवीक्षिता राज्ञा कृष्णेन सह धाम गृहं ससार अगमत् । सृ गतावित्यस्माल्लिट् । "धाम जन्म-प्रभास्थान प्रभाव सुखसद्मस्वि"ति रत्नमाला ॥ ८ ॥

अथ कुपितया कैकेय्या स्वपुत्राय भरताय दशरथात् भूमिः गृहीतेत्यस्यानुलोम्येन प्रतिपादकं, प्रातिलोम्येन रुक्मिणीपारिजातार्पण-रूपेणापराधेन सत्यभामा कोपमवापेत्यर्थस्य प्रदर्शकं पद्यं निबध्नाति —

सागसाभरतायेभमाभातामन्युमत्तया ।
सात्रमध्यमयातापेपोतायाधिगतारसा ॥ ९ ॥

पदच्छेदः

सागसा भरताय इभमाभाता मन्युमत्तया ।
सा अत्र मध्यमया तापे पोताय अधिगता रसा ॥

अत्र अयोध्यायां इभमाभाता इभमा गजलक्ष्मीः तया भाता शोभिता सा प्रसिद्धा रसा पृथ्वी मन्युमत्तया कोपवत्त्वेन तापे

स्वपुत्रराज्यालाभप्रयुक्ते सन्तापे सति सागसा सपापया रामस्य राज्यविघ्नरूपेण पापेन युक्तया। "आगः पापापराधयोः" इति विश्वः। मध्यमया दशरथस्य मध्यमभार्यया भरतजनन्या पोताय स्वपुत्राय भरताय अधिगता प्राप्ता। दशरथादिति शेषः॥

प्रातिलोम्येन त्वित्थं पाठः—

सारतागधियातापोपेतायामध्यमत्रसा।
यात्तमन्युमताभामा भयेतारभसागसा॥

पदच्छेदः

सारतागधिया तापोपेता या मध्यमत्रसा।
या आत्तमन्युमता भामा भयेता रभसागसा॥

या मध्यमत्रसा मध्यमरूपः त्रसरेणुः यस्याः सा तथोक्ता अत्यल्पमध्येत्यर्थः। या सत्यभामा सारतागधिया सारतां श्रेष्ठतां गच्छतीति सारतागा। तादृश्या धिया श्रेष्ठत्वं प्राप्तया बुद्ध्या उपलक्षिता सा सत्यभामा रभसागसा रभसकृतेन अनालोच्य त्वरयैव कृतेन आगसा रुक्मिणीपारिजातार्पणरूपेण अपराधेन आत्तमन्युमता गृहीतकोपात्मकमता भयेता भयं प्राप्ता च सती तापोपेता सन्तापेन युक्ता बभूवेत्यर्थः॥ ९॥

अथ कैकेयी रामस्याभिषेकं विघटय्य तस्मै काननप्रदा बभूवेत्यस्यार्थस्यानुलोम्येन प्रत्याययकं, प्रातिलोम्येन सत्यभामाकोपातिशयप्रत्याययकं श्लोकं संग्रथ्नाति—

तानवादपकोमाभारामेकाननदाससा ।
यालतावृद्धसेवाकाकैकेयीमहदाहह ॥ १० ॥

पदच्छेदः

तानवात् अपका उमाभा रामे काननदा आस सा ।
या लता अवृद्धसेवाका कैकेयी महदा अहह ॥

उमाभा हरिद्राभा। "उमा स्यादतसीगौरीहरिद्राकीर्तिकान्तिषु" इति रत्नमाला। अपका अपगतसुखा तानवात् कार्श्यात् लता वल्ली सपत्नीपुत्राभिषेकजनितदुःखेन वल्लीवत् अतिकृशेत्यर्थः। या कैकेयी अवृद्धसेवाका वृद्धस्य दशरथस्य सेवा शुश्रूषा न विद्यते यस्याः सा तथोक्ता। यद्वा हितोपदिष्टमहत्सेवारहितेत्यर्थः। सा कैकेयी महदा सती महं अभिषेकोत्सवं द्यति खण्डयतीति तथोक्ता। "मह उद्धव उत्सवः" इत्यमरः। रामे काननदा वनप्रदा आस बभूव। अहहेति खेदे ॥

प्रातिलोम्येन पाठस्त्वेवम्—

हहदाहमयीकेकैकावासेद्धवृतालया ।
सासदाननकामेराभामाकोपदवानता ॥

पदच्छेदः

हह दाहमयी केकैकावासेद्धवृतालया ।
सा सदाननका आमेरा भामा कोपदवानता ॥

दाहमयी दाहप्रचुरा अत्यन्तसन्तापेत्यर्थः। केकैकावासेद्ध-वृतालया केकानां मयूराणां एकावासः मुख्यस्थानं इद्धः भास्वरः वृतः कवाटादिभिस्संवृतः आलयः गृहं यस्याः सा तथोक्ता। मयूरादिध्वनिमनोहरं भास्वरमपि मन्दिरं सखीप्रभृतीनामागमननिवृत्तये कुपितया सत्यभामया कवाटादिभिः पिहितमिति भावः। सदाननकं आननमेव आननकं स्वार्थे क प्रत्ययः। सत् सुन्दरं आननं मुखं यस्याः सा तथोक्ता सा भामा सत्यभामा कोपदवानता कोप एव दवः दावाग्निः तेन आनता सती आमेरा आमस्य रोगस्य इरा भूमिः स्थानभूता बभूवेति यावत्। "आमो रोगे रोगभेद" इति रत्नमाला। अत्र रोगवाचिशब्देन तत्कार्यभूतः शोकः लक्ष्यते। हहेति खेदे॥ १०॥

अथ पितृभक्त्या रामो वनं प्राप्तवानिति प्रदर्शयन्तमानुलोम्येन, प्रातिलोम्येन श्रीकृष्णः स्वकृतापराधनिबन्धनया भीत्या कुपितसत्यभामा-सान्त्वनार्थं तत्सदनं प्रापेत्येवमर्थं प्रदर्शयन्तं श्लोकं आरचयति—

वरमानदसत्यासह्रीतपित्रादरादहो।
भास्वरस्थिरधीरोपहारोरावनगाम्यसौ॥ ११॥

पदच्छेदः

वरमानदसत्यासह्रीतपित्रादरात् अहो।
भास्वरः स्थिरधीरः अपहारोराः वनगामी असौ॥

भास्वरः प्रकाशमानः स्थिरधीरः निश्चलधैर्यः। महाशूर इत्यादौ महत्वं शौर्य इव स्थिरत्वं धैर्ये अन्वेतीति ध्येयम्। असौ रामचन्द्रः

वरमानदसत्यासह्रीतपित्रादरात् वराणां श्रेष्ठानां मानदे पूजाप्रदे सत्यासः सत्यनिरसनं। अस्यतेर्भावे घञ्। ततो ह्रीते लज्जिते पितरि दशरथे आदरात् भक्तितः अपहारोराः अपगतमुक्ताहारमुरः वक्षः यस्य स तथोक्तः। हारशब्दः आभरणान्तराणामपि प्रदर्शनार्थः। व्यपगतसर्वाभरणस्सन् इत्यर्थः। वनगामी काननं गतः बभूवेत्यर्थः। अहो आश्चर्यम् ॥

प्रातिलोम्येन त्वेवं पाठः—

सौम्यगानवरारोहापरोधीरस्स्थिरस्वभाः।
होदरादत्रापितह्रीसत्यासदनमारवा ॥

पदच्छेदः

सौम्यगानवरारोहापरः धीरः स्थिरस्वभाः।
हो दरात् अत्र आपितह्रीसत्यासदनं आर वा ॥

अत्र द्वारकायां सौम्यगानवरारोहापरः सुन्दरगानयुक्तकान्तातत्परः स्थिरस्वभाः शाश्वतनिजतेजाः धीरः धैर्यवान् श्रीकृष्णः आपितह्रीसत्यासदनं सपत्नीपारिजातार्पणात् स्वेनैव प्रापितह्रीकायाः सत्यभामायाः सदनं गृहं दरात् वा भयादिव आर प्राप। ऋगतावित्यस्माल्लिट्। हो शिष्यसंबुद्धिः। "होहो चैवंविधौ ज्ञेयौ संबुध्यां वानयोरपि" इति विश्वः। यद्वा हः दरात् इति पदच्छेदः। हः हरिरिति विशेष्यवाचकं पदम्। "हः शंकरे हरौ हंसे रणरोमाञ्चवाजिषु" इति रत्नमाला। वा शब्दः इवार्थकः। "वः प्रचेतसि जानीयात्

इवार्थे च तदव्ययं" इति मेदिनी। "व वा यथा तथैवैवं साम्य" इत्यमरश्च ॥ ११ ॥

अथानुलोम्येन जानक्याः रामभद्रेण सह वनप्राप्तिप्रत्याययकं, प्रातिलोम्येन कुपितायाः सत्यभामायास्सांत्वनार्थं गतः कृष्णः नावलोकितः। एवं अर्थं प्रदर्शयन्तं श्लोकं आरचयति—

यानयानघधीतादा रसायास्तनयादवे।
सागताहिवियाताह्रीसतापानकिलोनभा ॥ १२ ॥

पदच्छेदः

या नयानघधीतादा रसायाः तनया दवे।
सा गता हि वियाता ह्रीसतापा न किल ऊनभा ॥

नयानघधीतादा नयेन शास्त्रेण अनघा अदोषा धीः बुद्धिः यस्य सः नयानघधीः तस्य भावः नयानघधीता तां ददातीति तथोक्ता। स्वाश्रितानां शास्त्रनिर्दोषबुद्धित्वप्रदा। या रसायाः तनया भूमेः पुत्री ह्रीसतापा ह्रिया लज्जया तापयुक्ता। नायकराज्यविघ्नलज्जा-संजातविषादेत्यर्थः। सा सीता वियाता धृष्टा सती दवे वने गता हि यातवती हि। "वनवन्यानलौ दावं दावो वैश्वानरे हय" इति रत्नमाला। तथापि ऊनभा न किल न्यूनकान्तिर्नासीत् किल। "स्युः प्रभा रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः" इत्यमरः ॥

प्रातिलोम्येन पाठस्त्वेवम्—

भानलोकिनपातासह्रीतायाविहितागसा ।
वेदयानस्तयासारदाताधीघनयानया ॥

पदच्छेदः

भान् अलोकि न पाता सः ह्रीता या विहितागसा ।
वेदयानः तया सारदाता धीघनया अनया ॥

या सत्यभामा विहितागसा विहितेन कृतेन आगसा सपत्न्यै पारिजातप्रदानरूपेण अपराधेन ह्रीता लज्जिता जाता धीघनया ज्ञानाधिकया अनया सत्यभामया तयाऽनयेति निर्देशः । सैषेतिवत् । सारदाता धनप्रदः । "न्याये च नीरे च धने च सारं" इति विश्वः । भान् प्रकाशमानः भादीप्तावस्य शारीरं रूपम् । पाता रक्षकः सः वेदयानः वेदात्मकं यानं यस्य स तथोक्तः गरुडवाहन इत्यर्थः । सुपर्णोसि गरुत्मानित्याद्याः श्रुतयः । वेदात्मा विहगेश्वरः इत्याद्यभियुक्तोक्तयश्च अत्र प्रमाणानि । नालोकि नावलोकितः ॥ १२ ॥

अथ भगवान् रामचन्द्रः सायासस्सन् वनं गच्छन् भरद्वाजं अन्यांश्च मुनीनाससादेत्यानुलोम्येन प्रत्याययन्तं, पूर्वं कुपिता सत्यभामा कृष्णस्य वाक्यं न श्रुतवती न च स्वयं वाचमुवाच सैव कृष्णेन पारिजातानयनवाचि कथितायां भाषणं कृतवती इत्येतमर्थं प्रदर्शयन्तं प्रातिलोम्येन श्लोकमारचयति—

रागिराधुतिगर्वादारदाहोमहसाहह ।
यानगातभरद्वाजमायासीदमगाहिनः ॥ १३ ॥

पदच्छेदः

रागिराधुतिगर्वादारदाहः महसा हह ।
यान् अगात भरद्वाजं आयासी दमगाहिनः ॥

महसा तेजसा रागिराधुतिगर्वादारदाहः रागः अस्य अस्तीति रागि रं तीक्ष्णं । "रः पावके च तीक्ष्णे चे" ति विश्वः । आधुतिः खण्डनं तद्विषयो गर्वः तेन अदं क्षान्तिरहितं दा क्षान्तिः न विद्यते यस्य स तथोक्तं । "दा स्त्रियां क्षान्तिदानयोः" इति रत्नमाला । ईदृशं आरं अरीणां समूहः आरं, तस्य समूह इत्यण् । तत् दहतीति आरदाहः रागदुष्टतीक्ष्णखण्डनदर्पयुक्ताक्षान्तिकशत्रुसमूहभञ्जक इत्यर्थः। यान् गच्छन् अत एव आयासी आयासयुक्तः रामः भरद्वाजं मुनिं दमं गाहन्त इति दमगाहिनः दमवन्तो मुनयः तांश्च अगात उपासीदत् । हहेति खेदे ॥

प्रातिलोम्येन वचनप्रकारोऽयम् —

नोहिगामदसीयामाजद्वारभतगानया ।
हह साहमहोदारदार्वागतिधुरागिरा ॥

पदच्छेदः

नो हि गां अदसीयां आजत् वा आरभत गाः न या ।
हह सा आह महोदारदार्वागतिधुरा गिरा ॥

या सत्यभामा गाः वाचः नारभत न उपाक्रमत कोपात् कृष्णेन सह संभाषणं नारब्धवतीत्यर्थः। अदसीयां कृष्णसंबन्धिनीं गां वाचं नो आजद्वा नाजानाद्वा। अजतेर्गत्यर्थतया ज्ञानार्थस्य लङ्-रूपमिदम्। हिशब्दः प्रसिद्धौ। कृष्णोक्तं वाक्यं न श्रुतवती चेत्यर्थः। सा तादृश्येव सत्यभामा महोदारदार्वागतिधुरागिरा महोदारदारुः पारिजातवृक्षः तस्य आगतिधुरागिरा आगमनभारवाचा पारिजातागमनभारो ममैवेति कृष्णवाक्येनेति यावत्। आगतेः धूः आगतिधुरा आगतिधुरायाः गीः आगतिधुरागीरिति विग्रहः। आह संभाषणं कृतवतीत्यर्थः। हह आश्चर्यम्। या कृष्णेन सह संभाषणं न करोति, न च तदुक्तं शुश्राव सैव सत्यभामा पारिजातं आनेष्यामि तदागमनभारं अहमेव वहामि इति कृष्णोक्त्या प्रसन्ना तेन सह संभाषणं कृतवतीति भावः ॥ १३ ॥

अथ रामस्य चित्रकूटप्राप्तिं आनुलोम्येन प्रदर्शयन्तं, कृष्णस्य पारिजातानयनार्थं स्वर्गगमनं प्रातिलोम्येन प्रदर्शयन्तं श्लोकं निबध्नाति—

यातुराजिदभाभारं द्यां वमारुतगन्धगम्।
सोगमारपदं यक्षतुंगाभोनघयात्रया ॥ १४ ॥

पदच्छेदः

यातुराजिदभाभारं द्यां व मारुतगन्धगं।
सः अगं आर पदं यक्षतुंगाभः अनघयात्रया ॥

यक्ष इव कुबेर इव तुंगाभः प्रौढदीप्तिः सः राघवः यातुराजिं राक्षसपंक्तिं द्यति खण्डयतीति यातुराजिदः तादृशो भाभारः तेजोभारः यस्य स तथोक्तः तं राक्षसादिविधूननक्षमतेजोतिशय-शालिनमित्यर्थः । मारुतगन्धगं पवनसंबन्धं प्राप्तं मन्दानिल-शालिनमित्यर्थः । "गन्धो गन्धगसंबन्धामोदलेशस्मयेषु च" इति रत्नमाला । अगं पर्वतं स्थानं चित्रकूटगिरिरूपं स्थानं द्यां स्वर्गमिव अनघयात्रया निर्दोषया गत्या ऋष्यनुगुणया प्राण्यन्तरपीडारहितया स्वचरणैकसाधनया गत्या आर गतवान् । "यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे" इति विश्वः । अत्र यक्षतुंगाभः इति द्यामिवेति च वचनात् "सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः । यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने" इति रामायणार्थस्सूचितः ॥

प्रातिलोम्येन त्वित्थं पाठः—

यात्रयाघनभोगातुं क्षयदं परमागसः ।
गन्धगंतरुमावद्यां रंभाभादजिरा तु या ॥

पदच्छेदः

यात्रया घनभः गातुं क्षयदं परमागसः ।
गन्धगं तरुं आव द्यां रंभाभादजिरा तु या ॥

घनभः मेघप्रभः कृष्णः परमागसः परमस्य आगसः अपराधस्य सत्यभामायै पारिजाताप्रदानरूपस्य क्षयदं शान्तिप्रदं गन्धगं गन्धं दिव्यामोदं प्राप्तं तरुं पारिजातवृक्षं गातुं गन्तुं । गा

गतावित्यस्मात् तुमुन्। द्यां स्वर्गं यात्रया प्रस्थानेन आव गतवान्। यात्रयेत्यनेन देशान्तरमिव लोकान्तरमपि सशरीर एव प्राप्तवानिति प्रदर्शितः। या द्यौस्तु रंभाभादजिरा रंभया भात् विराजत् अजिरं अङ्कणं यस्याः सा तथोक्ता सत्यभामाविषये स्वकृतापराधशान्तये पारिजात-माहर्तुकामः कृष्णः तमुपागन्तुं रंभाद्यप्सरोभिः अलंकृतांकणं नाकं स्वरथं गरुडात्मकं तमारुह्य गतवानिति भावः ॥ १४ ॥

अथानुलोम्येन रामस्य दण्डकावनप्राप्तिप्रतिपादकं, प्रातिलोम्येन कृष्णस्य नन्दनवनप्राप्तिप्रतिपादकं च पद्यं रचयति—

दण्डकां प्रदमोराजाल्याहतामयकारिहा ।
ससमानवतानेनोभोग्याभोनतदासन ॥ १५ ॥

पदच्छेदः

दण्डकां प्रदमः राजाल्याः हतामयकारिहा ।
सः समानवतानेनोभोग्याभः न तदा आस न ॥

प्रदमः प्रकृष्टो दमः यस्य स तथोक्तः जितेन्द्रिय इत्यर्थः। राज्ञां आलिः राजालिः तस्याः क्षत्रियपंक्तेः हतामयकारिहा हतामयकः निर्धूतरोगः दृढगात्र इति यावत्। यः अरिः शत्रुः भृगुरामः तं हन्तीति पीडयतीति तथोक्तः। हननमत्र अवमतिकरणरूपं हिंसनं विवक्षितम्। क्षत्रियवर्गनिर्भजननिपुणभार्गवरामसामर्थ्यभंजक इत्यर्थः। समानवतानेनोभोग्याभः मानवता सहिताः समानवताः

मनुष्यत्वयुक्ताः ये अनेनसः निष्पापाः तेषां भोग्या आभा दीप्तिः यस्य स तथोक्तः। नित्यसूरिभोग्योऽपि भगवान् निर्दोषमानुषभोग्यरूपो जात इति सौलभ्यं परस्य दर्शितम्। सः रामः दण्डकां दण्डकावनं तदा तत्काले आस गतवान्। द्वौ नञौ प्रकृतार्थं सूचयतः।

प्रातिलोम्येन त्वेवं पाठः—

नसदातनभोग्याभो नोनेतावनमास सः।
हारिकायमताहल्याजारामोदप्रकाण्डदम्॥

पदच्छेदः

न सदातनभोग्याभः नो नेता वनं आस सः।
हारिकायमताहल्याजारामोदप्रकाण्डदम्॥

सदातनभोग्याभः नित्यभोग्या आभा यस्य स तथोक्तः। नित्यभोग्यदिव्यतेजस्क इत्यर्थः। सः नेता नायकः श्रीकृष्णः हारिणा मनोहारिणा कायेन देहेन मतस्य संमतस्य अहल्याजारस्य महेन्द्रस्य आमोदप्रकाण्डदं प्रशस्तानन्दप्रदं। "प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि" इत्यमरः। हारिकायमतेत्यहल्याया विशेषणम्। वनं नन्दनवनं आर प्राप्तवान्॥ १५॥

अथानुलोम्येन रामस्य विराधहन्तृत्वं अगस्त्यप्राप्तिं च प्रतिपादयितृकं, प्रातिलोम्येन कृष्णस्य नन्दनवनप्राप्त्यनन्तरं इन्द्रस्य भयसंजननप्रदर्शकं पद्यं ग्रथ्नाति—

सोरमारदनज्ञानोवेदेराकण्ठकुंभजम् ।
तं द्रुसारपटोनागानानादोषविराधहा ॥ १६ ॥

पदच्छेदः

सः अरं आरत् अनज्ञानः वेदेराकण्ठकुम्भजं ।
तं द्रुसारपटः अनागाः नानादोषविराधहा ॥

द्रुसारः तरुत्वक् पटः यस्य सः द्रुसारपटः चीरवासाः अनागाः आगः अपराधः न विद्यते यस्य स तथोक्तः, सर्वत्रापि निरपराध इत्यर्थः । अनज्ञानः अज्ञानविरोधी सः रामः नानादोष-विराधहा सन् नानाविधाः दोषाः हिंसादयः यस्य सः तादृशं विराधाख्यं हतवान् सन् तं प्रसिद्धं वेदेराकण्ठकुम्भजं वेदेरा वेदवाक् । "इरा भूवाक्सुराप्सु स्यात्" इत्यमरः । सा कण्ठे यस्य सः वेदेराकण्ठः तादृशं वेदोक्तिपरिपूर्णकण्ठं कुम्भजं अगस्त्यं अरं शीघ्रं आरत् प्राप्तवान् । मुनिवृत्तितया निरपराधः भजतां अज्ञान-निरोधकः रामः निर्निमित्तहिंसाकारणं विराधं हत्वा शरभंगाद्याश्रमा-नतिक्रम्य मुनिषु प्रसिद्धं वेदवाक्यालंकृतकण्ठं अगस्त्यं तूर्णमेव प्राप्तवानिति भावः ॥

प्रातिलोम्येन पाठस्तु—

हाधराविषदोनानागानाटोपरसाद्रुतम् ।
जम्भकुण्ठकरादेवेनोज्ञानदरमारसः ॥

पदच्छेदः

हा धराविषदः नानागानाटोपरसात् द्रुतम् ।
जम्भकुण्ठकराः देवेनः अज्ञानदरं आर सः ॥

धराविषदः धरायाः भूमेः विषदः जलप्रदः । इन्द्रस्य वृष्टिकारित्वात् गरलप्रद इत्यर्थः । तेन धरापालनप्रवृत्तश्रीकृष्णकर्तृकशिक्षार्हत्वं शक्रस्य युक्तं इति ध्वन्यते । "विषं तु गरले जले" इति रत्नमाला । नानागानाटोपरसात् नानाविधसंगीताडम्बरजन्यं रसं अत्ति अनुभवतीति तथोक्तः । विविधगन्धर्वस्वरसंगीतरसिक इत्यर्थः । जंभकुण्ठकराः जंभस्य तदाख्यस्य असुरस्य कुण्ठका भंजका राः संपत् यस्य स तथोक्तः । यद्वा रैशब्देन गतिरुच्यते । जम्भासुरनिरोधकसंगम इत्यर्थः । "रा स्त्रियां हेम्नि शालायां आशंसायां गतावपी" ति रत्नमाला । सः प्रसिद्धः देवानां इनः प्रभुः देवेन्द्रः अज्ञानदरं अज्ञानं च दरं च इति समाहारद्वन्द्वः । अत एकवद्भावः क्लीबता च । मोहं भयं च द्रुतं क्षिप्रं आर प्राप । हा कष्टम् । वर्षकमेघनियोजकः गन्धर्वादिसंगीतैः आमोदमानः जंभाद्यसुरालंभनसमर्थोऽपि देवेन्द्रः स्वर्गे कृष्णस्य आगमनं श्रुत्वा मूर्च्छितः द्रागेव भयमापेति कष्टमिति भावः ॥ १६ ॥

अथानुलोम्येन रामस्य गृध्रराजेन जटायुषा सेवितत्वं शूर्पणखायास्तत्र रतप्रार्थनं च, प्रातिलोम्येन तु शक्रस्य कृष्णविषयकापराधेन अपारदुःखप्राप्तिं पारिजातोत्पाटनेन नन्दनवनभंजकश्रीकृष्णाभिगमनं च प्रदर्शयन्तं श्लोकमाह—

सागमाकरपाताहाकंकेनावनतोहिसः ।
न समानर्दमारामालंकाराजस्वसा रतम् ॥ १७ ॥

पदच्छेदः

सागमाकरपाता हा कंकेन अवनतः हि सः ।
न समानर्द मा अरामा लंकाराजस्वसा रतं ॥

सागमाकरपाता आगमेन सहिताः सागमाः वेदविदः महर्षयः तेषां आकरः समूहः तस्य पाता रक्षिता । "आकरस्थानखन्यौ वा" इति रत्नमाला । सः रामचन्द्रः कंकेन गृध्रेण जटायुषा अवनतो हि सेवितः किल । अगस्त्याश्रमात् निर्गत्य दण्डकावनतपोधनरक्षको रामभद्रः पंचवट्यां जटायुषा मानितः अभूदिति भावः । तदानीं अरामा अमनोज्ञा । "रामः पशावित्यधिकृत्य सितासितमनोज्ञेषु" इति रत्नमाला । लंकाराजस्वसा लंकाराजः रावणः तस्य स्वसा शूर्पणखा । लंकाराज इति षष्ठ्यन्तं पृथक्पदं वा । रतं संभोगं समानर्द सम्यक् आनर्द ययाचे । न मा इति निषेधौ प्रकृतमर्थं दृढयतः ॥

प्रातिलोम्येन त्वित्थं पाठः—

तं रसास्वजराकालंमारामार्दनमासन ।
सहितोनवनाकेकं हातापारकमागसा ॥

पदच्छेदः

तं रसासु अजराकालं मा आरामार्दनं आस न ।
सः हितः अनवनाके अकं हाता अपारकं आगसा ॥

अनवे चिरन्तने नाके स्वर्गेऽपि अपारकं अपारं। स्वार्थे क-प्रत्ययः। अकं दुःखं। "अकं पापे च दुःखे" ति विश्वः। हाता प्राप्तः। हा गतावित्यस्मात् तृन्। सः इन्द्रः रसासु भूमिषु अजराकालं जराकालौ जरामरणे न विद्येते यस्य स तथोक्तः। "कालो नेहा यमो मृत्युरि" ति रत्नमाला। भूमौ अवतीर्णस्यापि हि हरेः जरामरणादि-विकारा न सन्ति। "विजरो विमृत्युरि" ति श्रुतेः। आरामार्दनं आरामस्य नन्दनवनस्य अर्दनं पारिजातोत्पाटनेन भंजकं तं श्रीकृष्णं आर प्राप्तवान्। पूर्वं हरेः मित्रभूतोऽपि शक्रः तत्प्रार्थितपारिजा-ताप्रदानरूपेणापराधेन नाकेऽपि निरवधिकं दुःखं प्राप्य पारिजातोत्पाटनेन नन्दनवनभंजकं अवताररूपेष्वपि जरामरणादिविकारदूरं शौरिं योद्धुकामः प्राप्तवानिति भावः ॥ १७ ॥

अथानुलोम्येन शूर्पणखानासिकाच्छेदस्य तस्याः राघवे वैरानु-बन्धस्य च प्रतिपादकं, प्रातिलोम्येन च शक्रस्य केशवसंभाषणारंभप्रतिपादकं श्लोकमारचयति —

तां स गोरमदोश्रीदो विग्रामसदरोतत ।
वैरमासपलाहारा विनासा रविवंशके ॥ १८ ॥

549
BVBSSMV

पदच्छेदः

तां सः गोरमदोश्रीदः विग्रां असदरः अतत ।
वैरं आस पलाहारा विनासा रविवंशके ॥

गोरमदोश्रीदः गोरमः भूरमणः रामचन्द्रः तस्य दोष्णोः बाह्वोः श्रीदः संपत्प्रदः । बाहुबलप्रदः सहाय इति यावत् । "रामस्य दक्षिणो बाहुः" इति रामायणम् । सः लक्ष्मणः सदरः सभयः न भवतीति असदरः निर्भयस्सन् तां शूर्पणखां विग्रां विगतनासिकां अतत अकृत । ततः पलाहारा मांसाहारा राक्षसी विनासा विगतनासिका सती रवेः वंशो यस्य सः रविवंशकः तस्मिन् सूर्यवंश-भवे रामे वैरं द्वेषं आस आददे । संभोगार्थिनीं शूर्पणखां श्रीरामसहायभूतो लक्ष्मणः निर्भयस्सन् तां शूर्पणखां विगतनासिकां अकरोत् । तेन नासाहीना कुपिता राक्षसी रामे वैरानुबन्धं कृतवतीति भावः ॥

प्रातिलोम्येन पाठस्त्वेवम्—

केशवं विरसानाविराहालापसमारवैः ।
ततरोदसमग्राविदोश्रीदोमरगोसताम् ॥

पदच्छेदः

केशवं विरसानाविः आह आलापसमारवैः ।
ततरोदसं अग्राविदः अश्रीदः अमरगः असताम् ॥

विरसानाविः रसः आनन्दः आनः प्राणनं बलं अविः कान्तिः विगताः रसानावयः आनन्दबलकान्तयः यस्य स तथोक्तः। असतां असुराणां अश्रीदः अलक्ष्मीप्रदः अमरान् गच्छतीति अमरगः देवैर्युक्त इति भावः। अग्राविदः अग्रभूताः अवयः पर्वताः तान् द्यति खण्डयतीति तथोक्तः पर्वतच्छेदी शक्रः। "अग्रंपुरःशिखामान-श्रेष्ठाधिकफलादिषु" इति रत्नमाला। ततरोदसं तते कृते रोदसी द्यावापृथिव्यौ येन स तथोक्तः ततरोदसं द्यावापृथिव्यादिस्रष्टारम्। "द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी" त्यमरः। "यथापूर्व-मकल्पयत् दिवं च पृथिवीञ्चान्तरिक्षमथो सुवः" इति श्रुतिः। केशवं कृष्णं आलापसमारवैः समीचीनैः शब्दैः सान्त्ववचनैरिति यावत्। तैर्युक्तस्सन् आह ब्रवीति स्म। असुरविषादकरः देवैर्युक्तोऽपि गोत्रभित् पारिजाताभिलाषप्रबद्धकृष्णस्पर्धया विगतानन्दबलदीप्तिकस्सन् अखिल-लोकस्रष्टारं कृष्णं अनुरूपसान्त्वशब्दोक्तिपूर्वकं समवोचदिति भावः॥ १८॥

अथानुलोम्येन राघवस्य खरसेनया युद्धप्राप्ति खरवधेन शोभमानत्वं तेन सकललोकव्यापिकीर्तिमत्वं च प्रदर्शयन्तं, प्रातिलोम्येन दिव्यस्य पारिजातस्य अनुचितं भूतलानयनं मा कुर्वित्येतमर्थं प्रतिपाद-यन्तं श्लोकमारचयति—

गोद्युगोमस्वमायोभूदश्रीगखरसेनया।
सहसाहवधारोविकलोराजदरातिहा॥ १९॥

पदच्छेदः

गोद्युगोमः स्वमायः अभूत् अश्रीगखरसेनया ।

सह साहवधारः अविकलः अराजत् अरातिहा ॥

अश्रीगखरसेनया अश्रीगः अलक्ष्मीं गतः यः खरः तन्नामको राक्षसः तस्य सेनया सह समं साहवधारः आहवधारया युद्धधारया सहितः । अविच्छिन्नयुद्धयुक्तः । तथापि अविकलः वैकल्यरहितः स्वमायः अमायः अदम्भः शोभना अमाया यस्य सः स्वमायः । "माया दंभे क्रियायां च" इति रत्नमाला । ईदृशः रामः अरातिहा खरदूषणादिशत्रुहन्ता सन् अराजत् प्रचकाशे । ततः गोद्युगोमः गौश्च द्यौश्च गोद्यावौ गौः पृथिवी द्यौः स्वर्गः द्यावापृथिव्यौ गच्छतीति व्याप्नोतीति गोद्युगा उमा कीर्तिः यस्य सः गोद्युगोमः । "उमा स्यादतसीगौरी हरिद्राकीर्तिकान्तिषु" इति रत्नमाला । अभूत् आसीत् । खरसेनया समं अविच्छिन्नसमरं कृत्वाऽपि अखण्डितगात्रः खरादीन् हत्वा रामो रराज । तेन चतुर्दशसंख्यखरादिराक्षसवधेन सकललोककीर्तिपात्रमासीदिति भावः ॥

प्रातिलोम्येन त्वित्थं पाठः—

हातिरादजरालोकविरोधावहसाहस ।
यानसेरखगश्रीद भूयोमास्वमगोद्युगः ॥

पदच्छेदः

हा अतिरादजरालोकविरोधावहसाहस ।

यानसेरखग श्रीद भूयः मा स्वं अगः द्युगः ॥

अतिरादः अत्यन्तं रादः दातारः ये अजरा निर्जराः देवाः तेषां आलोकः तेजः तद्विरोधावहं तद्विघातावहं साहसं यस्य स तथोक्तः तत्र संबुद्धिः। कर्मफलदातॄणां देवानां तेजोभंगकरसाहसयुक्तः इत्यर्थः। यानसेरखग इरया वाचा वेदवाचासहितः सेरः वेदमयः खगः गरुत्मान् यानभूतो वाहनभूतः सेरः खगः यस्य स तथोक्तः तस्य संबुद्धिः। श्रीद संपत्प्रद हे कृष्ण स्वं धनभूतः द्युगः नाकगतः अगः वृक्षः पारिजातवृक्षः भुवं यातीति भूयः भूलोकगतो माभूत्। देवतेजोभंगकारिपराक्रम, गरुडवाहन, संपत्प्रद, कृष्ण! नाकस्थपारिजातं भूलोकं मानैषीः इति भावः। हेति खेदे॥ १९॥

अथानुलोम्येन रघुनन्दने लंकेश्वरस्य विजिगीषाहंकारप्रतिपादकं, प्रातिलोम्येन प्रथमं शोकार्णवे निपतितस्यापि महेन्द्रस्य ततः धैर्यात् जयन्तादीन् प्रति पारिजातापहारिणं कृष्णं गृह्णीध्वमित्यादेशं प्रदर्शयन्तं श्लोकमाह—

हतपापचयेहेयो लंकेशोयमसारधीः।
राजिराविरतेरापोहाहाहंग्रहमारघः॥ २०॥

पदच्छेदः

हतपापचये हेयः लंकेशः अयं असारधीः।
राजि राविरतेरापः हाहा अहंग्रहं आर घः॥

राविरतेरापः अविरतं सन्ततं इरां सुरां पिबन्तीति अविरतेरापाः राः तीक्ष्णाः अविरतेरापाः राक्षसाः यस्य स तथोक्तः। "रः पावके च

तीक्ष्णे चे" ति विश्वः । घः घोरः । "घोरे तु घस्त्रिष्वि" ति रत्नमाला । असारधीः निस्सारबुद्धिः हेयः कुत्स्यः अयं लंकेशः रावणः हतपापचये पापानां खरादीनां राक्षसानां च यो गणः हतो येन स तथोक्तः । तस्मिन् राजि राजनि रामचन्द्रे । राट् शब्दोऽयम् । अहंग्रहं अहंबुद्धिं जेष्यामीत्याग्रहं आर प्राप ॥

प्रातिलोम्येन पाठस्तु—

घोरमाहग्रहंहाहापोरातेरविराजिराः ।
धीरसामयशोकेलं यो हेये च पपात ह ॥

पदच्छेदः

घोरं आह ग्रहं हाहापः अरातेः रविराजिराः ।
धीरसामयशोके अलं यः हेये च पपात ह ॥

रविराजिराः रविरिव सूर्य इव राजते शोभते इति तादृशी राः सुवर्णः यस्य स तथोक्तः । सूर्यप्रकाशभूषणादिरूपसुवर्णशालीत्यर्थः । यः हाहापः हाहाशब्दः हूहूप्रभृति सर्वगन्धर्वोपलक्षणार्थकः । हाहां पाति रक्षतीति हाहापः इन्द्रः हेये कुत्स्ये धीरसस्य ज्ञानानन्दस्य आमयभूते व्याधिभूते शोके दुःखे पारिजातापहारजन्ये अलं अत्यन्तं पपात । ह इति प्रसिद्धौ । चकारः उभयसमुच्चयार्थः । सः इन्द्रः घोरं भयंकरं अरातेः कृष्णस्य ग्रहणं आह उवाच । जयन्तादीन् प्रतीति शेषः ॥ २० ॥

अथानुलोम्येन रामस्य मारीचवधेन शोभमानत्वं बोधयत् सीतायाः लक्ष्मणसहायरहितस्थानवासित्वं च प्रतिपादयत्, प्रातिलोम्येन पारिजातं हृत्वा स्वर्गे सञ्चरता प्रद्युम्नयुक्तेन कृष्णेन सह इन्द्रस्य सञ्चाराक्षमतां च प्रतिपादयत् पद्यमाह—

ताटकेयलवादेनोहारीहारिगिराससः ।
हासहायजनासीतानाप्तेनादमनाभुवि ॥ २१ ॥

पदच्छेदः

ताटकेयलवात् एनोहारी हारिगिरा आस सः ।
हा असहायजना सीता अनाप्तेना अदमनाः भुवि ॥

हारिण्या मनोहारिण्या गिरा स्वनामरूपया वाचा एनोहारी पापहरः । रामनामोच्चारणेन रामस्य तदुच्चारयितृपापहरत्वं हि प्रसिद्धम् । सः रामः ताटकेयलवात् ताटकेयस्य मारीचस्य लवात् च्छेदात् आस दिदीपे । "लवो रामसुते लेशे च्छेदनेऽपि च" इति रत्नमाला । अनन्तरं भुवि स्वस्थाने अनाप्तेना अनाप्तः अप्राप्तः इनः नाथः यया सा तथोक्ता स्वस्थाने रामसंनिधान-रहितेत्यर्थः । अदमनाः अदं क्षान्तिरहितं मनः यस्याः सा तथोक्ता । हन्यमानमारीचशब्दे काकुत्स्थार्तिध्वनित्वभ्रान्त्या तच्छ्रवणमसह-मानेत्यर्थः । "दा स्त्रियां क्षान्तिदानयोः" इति रत्नमाला । सीता असहायजना सहायजनरहितेत्यर्थः । जातेत्यर्थः । हा शब्दः एकाकिन्याः विजने वने अवस्थानं अनुचितमिति द्योतयति ॥

प्रतिलोमपाठस्तु—

विभुनामदनाप्तेनातासीनाजयहासहा ।
ससरागिरिहारीहानोदेवालयकेटता ॥

पदच्छेदः

विभुना मदनाप्तेन आत आसीनाजयहासहा ।
सः सराः गिरिहारी हा नो देवालयके अटता ॥

आसीनाजयहासहा आसीनः स्ववाहने उपविष्टः अजयः जयस्य जयन्तस्य विरोधी प्रद्युम्नः "जयो जयन्ते विजये जया दुर्गाग्निमंथ्ययोः" इति विश्वः । तस्य हासं युद्धाट्टहासं हन्तीति आसीनाजयहासहा वाहरूढजयन्तप्रतिस्पर्धिप्रद्युम्नरणाट्टहासं शरवर्षेण निराकृतवानित्यर्थः । सराः ससंपत्कः गिरिहारी गिरीन् पर्वतादीन् हरति प्रहरतीति तथोक्तः सः इन्द्रः देवालय एव देवालयकः तस्मिन् त्रिदशालये अटता परिभ्रमता स्वर्गं प्रदक्षिणीकुर्वता मदनाप्तेन प्रद्युम्नाश्रितेन विभुना श्रीकृष्णेन सह नो आत नातति स्म । अत सातत्यगमने इत्यस्माल्लिट् । गिरिपक्षच्छेदकोऽपि जयन्तजित्प्रद्युम्नाट्टहासनिवारकोऽपि शक्रः स्वर्गं परितः संचरन्तं प्रद्युम्नाश्रितं श्रीकृष्णं अनुगन्तुं शक्तो नाभूत् इति भावः ॥ २१ ॥

अथानुलोम्येन रावणेन सीता हृतेति प्रतिपादयन्तं, प्रातिलोम्येन स्वमित्रभूतप्रवराख्यब्राह्मणाप्यायिततेजसा शक्रेण प्रद्युम्नतेजोभंगः कृत इति प्रदर्शयन्तं श्लोकमाह—

भारमाकुदशाकेनाशराधीकुहकेनहा ।
चारुधीवनपालोक्या वैदेहीमहिताहृता ॥ २२ ॥

पदच्छेदः

भारमा कुदशाकेन आशराधीकुहकेन हा ।
चारुधीवनपालोक्या वैदेही महिता हृता ॥

भारमा भासा लक्ष्मीः सीतायाः लक्ष्म्यभेदेऽपि मानुषावतारत्वं अवलंब्य भेदव्यपदेशः । रामस्य विष्ण्वभेदेऽपि "विष्णुना सदृशो वीर्ये" इति भेदव्यपदेशवत् । चारुधीवनपालोक्या चारुधियः सुबुद्धयः ये वनपाः वनरक्षकाः देवाः तैः आलोक्या अवलोकितुं योग्या । वनदेवता-मात्रसाक्षिकेति यावत् । महिता पूजिता वैदेही जानकी कुदशाकेन कुत्सितावस्थाकेन सीताहरणोद्योगात् आयुषः क्षयदुर्दशा जातेति भावः । आशराधीकुहकेन आशरेण राक्षसरूपेण अधीकुहकेन अबुद्धिना वञ्चकेन । "क्रव्यादोऽसृक्प आशरः" इत्यमरः । वञ्चनार्थं संन्यासिरूपं धृतवता रावणेन हृता गृहीता । हा कष्टम् ॥

प्रतिलोमपाठस्तु—

ताहृताहिमहीदेवैक्यालोपानवधीरुचा ।
हानकेहकुधीराशनाकेशादकुमारभाः ॥

पदच्छेदः

ताः हृताः हि महीदेवैक्यालोपानवधीरुचा ।
हानकेहकुधीराशनाकेशा अदकुमारभाः ॥

महीदेवस्य मित्रभूतस्य प्रवराख्यस्य ब्राह्मणस्य ऐक्येन सौहार्देन। रामसुग्रीवयोरैक्यमितिवत्। अलोपे नाशरहिते अनवधीरुचौ चिरन्तन प्रज्ञातेजसी यस्य स तथोक्तः तेन। इन्द्रस्य सखा कश्चित् प्रवरनामा ब्राह्मणः समागत्य श्रीकृष्णशरघातविषण्णस्य शक्रस्य यथा निस्संज्ञता निस्तेजस्कत्वं च न भवति तथा स्वयं साहाय्यकं आचरितवानिति हरिवंशे प्रसिद्धम्। हानकेहकुधीराशनाकेशा हानमेव हानकं युद्धत्यागः तस्मिन् ईहा इच्छा येषां ते तथोक्ताः तादृशाः ये कुधीराः धीराभासाः तेषु आशा रक्षणेच्छा यस्य स तथोक्तः तेन नाकेशा स्वर्गनाथेन शक्रेण। ईट् शब्दोऽयं तृतीयान्तः। शरघातभीत्या युद्धं त्यक्त्वा पलायनोद्युक्तानां कुत्सित धैर्यबलवतां देवानां रक्षणं चिकीर्षता स्वर्गेश्वरेणेत्यर्थः। ताः प्रसिद्धाः अदकुमारभाः अदस्य क्षान्तिरहितस्य कुमारस्य प्रद्युम्नस्य भाः दीप्तयः हृता हि अपहृताः खलु ॥ २२ ॥

अथानुलोम्येन रामचन्द्रस्य सीतावियोगिनः हनूमत्समागमं सुग्रीवस्य राज्यभ्रष्टस्य दुर्बलस्य रामप्राप्तिं च दर्शयन्तं, प्रातिलोम्येन च शक्रेण युधि तेजोभंगं प्रापितस्य प्रद्युम्नस्य पुनः क्षणादेव तेजोलाभं शत्रुघातित्वं च प्राप्तवतः शरघातश्रमहरशीतवातशालिनभोदेशाकलनं च प्रतिपादयन्तं श्लोकमाह—

हारितोयदभोरामावियोगेनघवायुजः।
तंरुमामहितोपेतामोदोसारज्ञरामयः ॥ २३ ॥

पदच्छेदः

हारितोयदभः रामावियोगे अनघवायुजः ।

तं रुमामहितः अपेतामोदः असारज्ञः आम यः ॥

हारी मनोहारी तोयदः मेघः तस्य भेव भा यस्य सः हारितोयदभः मनोहरमेघप्रभः रामावियोगे सीताविश्लेषे सति अनघवायुजः अनघः निर्दोषः वायुजः हनूमान् यस्य स तथोक्तः सीताविश्लेषानन्तरं हनुमता संगतो जातः इत्यर्थः । तं रामं असारज्ञः सारो बलं ज्ञः कीर्तिः तौ न विद्येते यस्य स तथोक्तः । "ज्ञः कीर्त्यां संगर" इति रत्नमाला । दुर्बलत्वेन वालितः पराजयं प्राप्तः सुग्रीवः विगतयशा इति भावः । अत एव अपेतामोदः व्यपगतसंतोषः रुमामहितः रुमाख्यया स्त्रिया महितः पूज्यः रुमाभर्ता सुग्रीव इति यावत् । आम प्राप्तवान् । "आम गत्यादिषु" इत्यस्माल्लिट् ॥

प्रतिलोमपाठस्तु—

योमराज्ञरसादोमोतापेतोहिममारुतम् ।

जोयुवाघनगेयोविमाराभोदयतोरिहा ॥

पदच्छेदः

यः अमराज्ञः असादोमः अतापेतः हिममारुतं ।

जः युवा घनगेयः विं आर आभोदयतः अरिहा ॥

यः युवा प्रद्युम्नः अमराज्ञः अमरैः देवैः सह अज्ञः अयुद्धं यस्य स तथोक्तः देवैः सह युद्धरहितो जात इत्यर्थः । अत्र ज्ञशब्दः

संगरवाची। स एव हिममारुतं हिमाः शीतलाः मारुताः वाताः यस्मिन् स तथोक्तः तं विं आकाशं। "विश्वक्षुषि व्योम्नि पाते परमात्मनि पक्षिणि" इति रत्नमाला। आर प्राप्तवान्। तदनन्तरं अतापेतः तापेन इतः प्राप्तः न भवतीति तथोक्तः। आभोदयतः तेजसः उदयतः प्रादुर्भावात् अरिहा शत्रुहन्ता जः जेता सन्। "जो जये विजये मेरौ शब्दे जेतरि मत्सर" इति रत्नमाला। असादोमः असादा अनवसादा उमा कीर्तिः यस्य स तथोक्तः। अतएव घनगेयः प्रौढैः स्तुत्यो जातः। प्रथमं इन्द्रशरघातेन विसंज्ञत्वात् क्षणं अमरैः सह युद्धरहितोऽपि पुनः शीतवातायुतवियदाकलनया निरस्ततापः पुनः तेजोदयेन शत्रून् हत्वा अनवसन्नकीर्तिः सन् प्रौढानां स्तुतिविषयः बभूवेति भावः ॥ २३ ॥

अथानुलोम्येन रामोऽपि वालिवधं कृतवान् इत्येतमर्थं प्रदर्शयन्तं, प्रातिलोम्येन कृष्णो वासवशरार्दितवैनतेयरक्षणं कृतवानित्येतमर्थं प्रदर्शयन्तं श्लोकमाह—

भानुभानुतभावामासदामोदपरोहतं।
तंहतामरसाभाक्षोतिराताकृतवासविम् ॥ २४ ॥

पदच्छेदः

भानुभानुतभाः वामासदामोदपरः हतं।
तं ह तामरसाभाक्षः अतिराता अकृत वासविम् ॥

भानुभानुतभाः सूर्यतेजसा नुता स्तुता भा दीप्तिः यस्य स तथोक्तः। सूर्यतेजोऽधिकतेजस्कः इत्यर्थः। वामायाः स्त्रियः सीतायाः

सदामोदपरः समीचीनानन्दजननतत्परः। "रामा वामा वामनेत्रा पुरन्ध्री" इति हलायुधः। अतिराता अत्यन्तं राता दाता तामरसस्य आभेवाभा ययोः ते तामरसाभे तथाभूते अक्षिणी यस्य सः तामरसाभाक्षः रामः तं प्रसिद्धं वासविं वासवस्य अपत्यं पुमान् वासविः तं इन्द्रपुत्रं वालिनं हतं अकृत जघानेत्यर्थः। ह शब्दः पादपूरणे। "ह स्यात् संबोधने पादपूरणे नाव्ययं शिव" इति विश्वः॥

प्रतिलोमपाठस्तु —

विंसवातकृतारातिक्षोभासारमताहतं।
तंहरोपदमोदासमावाभातनुभानुभाः॥

पदच्छेदः

विं सः वातकृतारातिक्षोभासारमताहतं।
तं हरोपदमः दासं आव आभातनुभानुभाः॥

आभया कान्त्या तन्वी लघ्वी भानुभाः सूर्यकान्तिः यस्य स तथोक्तः तेजसा लघूकृततपनदीप्तिरिति यावत्। न तत्र सूर्यो भातीति श्रुतिः। हरोपदमः शिवस्य निग्राहकः बाणाहवव्याहतशंभुशक्तिरित्यर्थः। सः कृष्णः वातेन पक्षपवनेन कृतानि अरातीनां शत्रूणां क्षोभासारमताहतानि येन सः वातकृतारातिक्षोभासारमताहतः क्षोभं संचलनं असारः बलाभावः मताहतं अभिमतहानिः पक्षवातेनैव परिपन्थिनां क्षोभं दौर्बल्यं अभिमतार्थहानिं च कुर्वन्तमित्यर्थः। तं दासं विं पक्षिणं गरुडम्। दासस्सखावाहनमासनं ध्वज इत्याद्यभियुक्तोक्तेः। आव ररक्ष॥ २४॥

अथ वालिवधानन्तरं श्रीरामचन्द्रस्य रावणवधोदर्कजयलक्ष्मी-प्राप्ति ततस्सुग्रीवसेनालाभप्रयुक्ततेजोतिशयसिद्धिं च आनुलोम्येन प्रतिपादयन्तं, समरश्रान्तपक्षिराजरक्षणकत्वेन उक्तस्य कृष्णस्य शक्रपराभवोपयुक्तजयलक्ष्मीसिद्धिं प्रातिलोम्येन दर्शयन्तं श्लोकमाह—

हंसजारुद्धबलजापरोदारसुभाजनि ।
राजिरावणरक्षोरविघातायरमारयम् ॥ २५ ॥

पदच्छेदः

हंसजारुद्धबलजा परोदारसुभा अजनि ।
राजि रावणरक्षोरविघाताय रमा आर यं ॥

यं श्रीरामं रावणरक्षोरविघाताय रावणाख्यरक्षसः रं शिरः तस्य विघाताय च्छेदाय । "रं क्लीबे रुधिरे मूर्ध्नि" इति रत्नमाला । रमा जयलक्ष्मीः आर प्राप्तवती तस्मिन् राजि राज्ञि रामे हंसजारुद्धबलजा हंसजस्य सूर्यपुत्रस्य सुग्रीवस्य । "भानुर्हंससहस्रांशुः" इत्यमरः । अरुद्धबलजा अप्रतिहतसेनाजन्या परोदारसुभा परमोत्कृष्टशोभनदीप्तिः अजनि बभूव । वालिवधेन जयलक्ष्मीं प्राप्तवति सति सुग्रीवानीकलाभप्रयुक्तं परभीकरं परमोत्कृष्टं तेजः समजनीति भावः ॥

प्रतिलोमपाठस्तु—

यंरमारयताघाविरक्षोरणवराजिरा ।
निजभासुरदारोपजालबद्धरुजासहम् ॥

पदच्छेदः

यं रमा आर यताघा विरक्षोरणवराजिरा ।
निजभा सुरदा रोपजालबद्धरुजासहं ॥

रोपजालेन बाणसमूहेन । "बाणो रोप इषुर्द्वयोः" इत्यमरः । बद्धा रुजा वेदना तत्सहिष्णुं विक्षिप्तशरनिकरप्रयुक्तदुःखसहिष्णुं यं श्रीकृष्णं यताघा व्यपगतदोषा विरक्षः विगतराक्षसं रणवराजिरं युद्ध-श्रेष्ठांकणं यया सा विरक्षोरणवराजिरा निजा अविनाशिनी भा दीप्तिः यया सा तथोक्ता । "निजौ स्वीयाविनाशिनौ" इति रत्नमाला । सुरदा सुरान् देवान् द्यति खण्डयतीति तथोक्ता रमा जयलक्ष्मीः आर प्राप । सः गरुत्मन्तं ररक्षेति पूर्वेणान्वयः ॥ २५ ॥

अथानुलोम्येन सागरमतिक्रम्य सीतां दृष्ट्वा पुनरायान्तं हनूमन्तमासाद्य रघुवीरः सह्यमलयपर्वतान् समुद्रवेलां च प्राप्तस्सन् रराजेति वर्णयन्तं, प्रातिलोम्येन श्रीकृष्णः प्रद्युम्नाद्यपराधेन शक्रं प्रति नितरां कुपितः तज्जयं लब्ध्वा तेजोतिशयशाली सन् पारिजातं दृढं जग्राहेति संदर्शयन्तं श्लोकमाह—

सागरातिगमाभातिनाकेशोसुरमासहः ।
तंसमारुतजंगोप्ताभादासाद्यगतोगजम् ॥ २६ ॥

पदच्छेदः

सागरातिगं आभातिनाकेशः असुरमासहः ।
तं सः मारुतजं गोप्ता अभात् आसाद्य गतः अगजं ॥

आभातिनाकेशः आभया दीप्त्या अतिनाकेशः शक्रमतिक्रान्तः। इन्द्राभ्यधिकतेजस्क इत्यर्थः। असुरमा दानवलक्ष्मीः तदसहः। असुरसंपदसहिष्णुः इत्यर्थः। गोप्ता सर्वपालकः सः रामः सागरातिगं सागरं अतिलंघितवन्तं प्रसिद्धं मारुतजं वायुसूनुं आसाद्य प्राप्य अगजं अगाश्च जा च अगजं द्रव्यदैवतमितिवत् समाहारद्वन्द्वः। अगाः सह्यादि-शैलाः जा सागरवेला। "जास्त्रियां देववाहिन्यां योनिसागरवेलयोः" इति रत्नमाला। शैलान् सागरवेलां च गतस्सन् अभात् अराजत्॥

प्रतिलोमपाठस्तु—

जंगतोगद्यसादाभाप्तागोजंतरुमासतं।
हस्समारसुशोकेनातिभामागतिरागसा॥

पदच्छेदः

जं गतः गदी असादाभाप्ता गोजं तरुं आस तं।
हः समारसुशोकेन अतिभामागतिः आगसा॥

मारस्य प्रद्युम्नस्य सुशोकः अतिखेदः तेन सहितं समारसुशोकं तेन आगसा अपराधेन। प्रद्युम्नदुःखप्रयुक्तेन शरार्पणादिरूपेण शक्रस्यापराधेन अतिभामागतिः अतिमात्रक्रोधागमः। "भामः क्रोधे रवौ दीप्तौ" इति रत्नमाला। गदी गदावान् जं विजयं। "जो जये विजये" इति रत्नमाला। गतः प्राप्तः। असादाभाप्ता असादां

अवसादरहितां आभां दीप्तिं आप्ता प्राप्ता हः हरिः गोजं स्वर्गप्रभवं। "स्वर्गेषु पशुवाग्वज्र दिङ्नेत्रघृणिभूजले" इत्यमरः। तं तरुं पारिजातं आस जग्राह ॥ २६ ॥

अथानुलोम्येन सेतुमार्गेण सागरे गच्छन्त्याः वानरसेनायाः संरक्षको रामः रराजेति प्रतिपादयत्, प्रातिलोम्येन गृहीतपारिजातं कृष्णं सेवाकृतां शत्रुजयप्रदत्वेन तद्विमुखानां शत्रुभयप्रदत्वेन वर्णयत् पद्यं ग्रथ्नाति —

वीरवानरसेनस्य त्राताभादवता हि सः।
तोयधावरिगोयादस्ययतोनवसेतुना ॥ २७ ॥

पदच्छेदः

वीरवानरसेनस्य त्राता आभात् अवता हि सः।
तोयधौ अरिगोयादसि अयतः नवसेतुना ॥

सः रामः अरिगोयादसि गाश्च यादांसि जलानि जलजन्तवश्च अरीणि अक्षयाणि गोयादांसि यस्य सः तस्मिन्। "रिशब्दस्तु ब्रुवे क्षये" इति रत्नमाला। तोयधौ समुद्रे अवता रक्षता प्रतिबन्धेभ्यो रक्षणं कुर्वता नवसेतुना अयतः गच्छतः वीरवानराणां सेना वीरवानरसेनं तस्य। "विभाषा सेनासुराच्छायाशालानिशानां" इति सेनाशब्दस्य क्लीबता। त्राता सन् रक्षिता सन् आभात् बभासे। हि प्रसिद्धौ ॥

प्रतिलोमपाठस्तु—

नातुसेवनतोयस्यदयागोरिवधायतः ।
सहितावदभातात्रास्यनसेरनवारवी ॥

पदच्छेदः

ना तु सेवनतः यस्य दयागः अरिवधायतः ।
सः हि तावत् अभाता त्रासी अनसेः अनवारवी ॥

ना तु मनुष्यस्तु यस्य कृष्णस्य सेवनतः सेवया स्तोत्रादिरूपया सेवया यस्य दयागः कृपां प्राप्तस्सन् अरिवधेन शत्रुवधेन आयतः विस्तीर्णः अभिवृद्धः इति यावत् । अनवारवी नवारवः स्तवरूपशब्दः अस्यास्तीति नवारवी स न भवतीति अनवारवी कृष्णविषयकस्तोत्रशब्द-रहितः सः ना अनसेः असिरहितादपि त्रासी भीतिमान् सन् किमुत खड्गयुक्तशत्रोरिति भावः । अभाता हि प्रकाशहीनः खलु । यस्य सेवकः शत्रुवधेन वर्धते यद्विषयकस्तोत्रस्य अकर्ता तु निरायुधादपि शत्रोः त्रस्यन् न प्रकाशते सः कृष्णः पारिजातमग्रहीत् इति पूर्वेणान्वयः ॥ २७ ॥

अथानुलोम्येन उदग्रविक्रमशाली रावणप्राणहरणं कृत्वा सीता-मनुप्राप्य स्वाश्रितविभीषणखेदहरो रामः सर्वदैवतैः पूजितः इति प्रतिपादयन्तं, प्रातिलोम्येन श्रीकृष्णः शत्रुभंगमारचय्य जयशीलः सकलैः स्तूयमानः पुनरवनीमवापेति प्रत्याययन्तं श्लोकमाह—

हारिसाहसलंकेनासुभेदीमहितोहिसः ।
चारुभूतनुजोरामोरमाराधयदार्तिहा ॥ २८ ॥

पदच्छेदः

हारिसाहसलंकेनासुभेदी महितः हि सः ।
चारुभूतनुजः रामः अरं आराधयदार्तिहा ॥

हारिसाहसः मनोज्ञविक्रमः यः लंकेनः लंकायाः इनः स्वामी रावणः तस्य असुभेदी प्राणनाशकः अनन्तरं चारुः मनोज्ञा भूतनुजा सीता यस्य सः चारुभूतनुजः अरं द्रुतं आराधयदार्तिहा पूजयतः विभीषणस्य आर्तिहा खेदहरः सः रामः महितो हि सर्वदैवतैः पूजितः खलु ॥

प्रतिलोमपाठस्तु—

हार्तिदायधरामारमोराजोनुतभूरुचा ।
सहितोहिमदीभेसुनाकेलंसहसारिहा ॥

पदच्छेदः

हा आर्तिदाय धरां आर मोराः जः नुतभूः रुचा ।
सः हितः हि मदीभे सुनाके अलं सहसा अरिहा ॥

आर्तिं द्यति खण्डयतीति आर्तिदः युद्धजन्यस्वखेदहरः प्रद्युम्नः सात्यकिर्वा तस्मै हितः हितयोगे चतुर्थी मदीभे मदी मदयुक्तः इभः ऐरावतः गजः यस्य सः मदीभः तस्मिन् सुनाके शोभने स्वर्गे अलं अत्यन्तं सहसा वेगेन अरिहा शत्रुभञ्जकः अत एव जः जेता नुतभूः नुतं नुतिः तस्य भूः स्थानं सर्वेषां स्तोत्रस्थानभूतः । रुचा तेजसा

मोराः माः लक्ष्मीः उरसि यस्य सः मोराः सः कृष्णः धरां भूमिं आर प्राप्तवान् हि ॥ २८ ॥

अथानुलोम्येन रामचन्द्रस्य अयोध्याप्राप्तिं, प्रातिलोम्येन श्रीकृष्णस्य द्वारकाप्रवेशं च प्रतिपादयन्तं श्लोकमाह—

नालिकेरसुभाकारागारासौसुरसापिका ।
रावणारिक्षमेरापूराभेजे हि ननामुना ॥ २९ ॥

पदच्छेदः

नालिकेरसुभाकारागारा असौ सुरसापिका ।
रावणारिक्षमेरा पूः आभेजे हि न न अमुना ॥

नालिकेरैः नालिकेरवृक्षैः सुभाकाराणि शोभनप्रान्तभाकृतीनि अगाराणि यस्यां सा नालिकेरसुभाकारागारा सुरसापिका सुरसस्य शोभनरागस्य आपिका प्रापिका स्पृहणीयेति यावत् । रावणारिक्षमेरा रावणारेः दशकण्ठशत्रोः क्षमा उचिता इरा भूमिः स्थानं यस्याः सा तथोक्ता रामचन्द्रनिवासार्हक्षितिमतीत्यर्थः । असौ पूः अयोध्यापुरी अमुना रामचन्द्रेण आभेजे हि सेविता खलु । द्वौ नञौ प्रकृतमर्थं दृढयतः ॥

प्रतिलोमपाठस्तु—

नामुनानहिजेभेरापूरामेक्षरिणावरा ।
कापिसारसुसौरागाराकाभासुरकेलिना ॥

पदच्छेदः

न अमुना न हि जेभेरा पूः आमे अक्षरिणा वरा ।
का अपि सारसुसौरागा राकाभासुरकेलिना ॥

जेभेरा जाः जेतारः इभाः गजाः यस्यां सा जेभा इरा भूमिः यस्याः सा जेभेरा जयशीलगजयुक्तभूमिकेत्यर्थः । वरा श्रेष्ठा कापि पूः द्वारकापुरी अक्षरिणा धर्मवता । "अक्षरं प्रणवे धर्म" इति रत्नमाला । राकाभासुरकेलिना राकासु नवरजोनारीषु गोपीषु भासुरा केलिः लीला यस्य स तथोक्तः । "राका नवरजोनार्यां पूर्णचन्द्रतिथावपि" इति रत्नमाला । अमुना श्रीकृष्णेन सारसुसौरागा सती सारः परमशोभनः सौरागः सुरसंबन्धी वृक्षः पारिजातः यस्यां सा तथोक्ता सती आमे हि जग्मे हि । श्रीकृष्णः द्वारकां पारिजातवतीं कुर्वन्नेव विवेशेति भावः ॥ २९ ॥

अथानुलोम्येन रामचन्द्रप्रवेशानन्तरं अयोध्याभूमेः महालक्ष्मीप्राप्तिं रामस्य राज्यसिद्धिं च कथयन्तं, प्रातिलोम्येन सत्यभामागृहांकणस्य पारिजातस्थानत्वं सत्यभामायाः पारिजातकुसुमधारणेन अत्यद्भुतकान्तिसंपत्कृष्णरुक्मिणीविषयरोषनिवृत्तिसमीचीनज्ञानादिसिद्धिं च सूचयन्तं श्लोकं आह—

साग्र्यतामरसागारामक्षामाघनभारगौः ।
निजदेपरजित्यास श्रीरामे सुगराजभा ॥ ३० ॥

पदच्छेदः

सा अग्र्यतामरसागारां अक्षामा घनभा आर गौः ।
निजदे अपरजिति आस श्रीः रामे सुगराजभा ॥

रामप्रवेशानन्तरं सा गौः । अयोध्याभूमिः "गौर्नाके वृषभे चन्द्रे

वाग्भूदिग्धेनुषु स्त्रियां" इति रत्नमाला। अक्षामा अकृशा घनभा अतिदीप्तिश्च सती अग्र्यतामरसागारां अग्र्यां उत्तमां तामरसं पद्मं अगारं गृहं यस्याः सा तामरसागारा लक्ष्मीः तां आर प्राप्तवती। निजदे स्वरूपप्रदे अपराजिति रावणादिशत्रुजेतरि रामे सुगराजभा सुगा राजभा राजदीप्तिः यस्याः सा तथोक्ता राज्येन हि राजतेजस्सुगमं भवति। श्रीः राज्यमयी संपत् आस बभूव ॥

प्रतिलोमपाठस्तु—

भाजरागसुमेराश्रीसत्याजिरपदेजनि ।
गौरभानघमाक्षामरागासारमताग्र्यसा ॥

पदच्छेदः

भा अजरागसुमेरा श्रीसत्याजिरपदे अजनि ।
गौरभा अनघमा क्षामरागा सा अरमत अग्र्यसा ॥

अजरागः अजराणां निर्झराणां अगः पारिजातः तस्य सुमानि पुष्पाणि इरा स्थानं यस्याः सा अजरागसुमेरा पारिजातकुसुमनिष्ठा भा दीप्तिः श्रीसत्याजिरपदे श्रीसत्यायाः श्रीमत्याः सत्यभामायाः अजिरपदे अंकणपदे स्थाने अजनि अजायत। पारिजातकुसुमदीप्तिः अत्यद्भुता सत्यभामांकणे प्रससारेति तदंकणे पारिजातः कृष्णेन स्थापित इति व्यज्यते। तेन सा सत्यभामा गौरभा पूर्वापेक्षया अधिकतटिद्गौरकान्तिः अनघमा निर्दोषसंपत्का क्षामः क्षीणः रागः मात्सर्यं यस्याः सा क्षामरागा पारिजातानयनेन नारददत्ततत्कुसुमग्राहिण्यां रुक्मिण्यां तद्दातरि

कृष्णे प्ररूढं मात्सर्यं उज्झितवतीति भावः। "रागोऽनुरागे मात्सर्य" इति रत्नमाला। अग्र्यसा अग्र्यं श्रेष्ठं सं ज्ञानं यस्याः सा। "सं क्लीबे स्यन्दनपथे ज्ञाने ध्याने निवारणे" इति रत्नमाला। समीचीनविवेकवती च सती अरमत कृष्णेन साकं क्रीडति स्म ॥ ३० ॥

॥ श्री रामकृष्णाभ्यां नमः ॥

श्रीमद्राघवयादवाकृतिधरश्शेषाचलोत्तंसकः
श्रेयोहेतुमचीकरत्कृतिमिमां श्रीशो मया दुष्कराम्।
तस्मादत्र पवित्रमाधवकथास्वादोन्मिषत्कौतुकाः
सन्तस्साधु वितन्वतां गुणविदः श्लाघ्याममोघादराः ॥

इति श्रीमद्वादिहंसाचार्यावतंसवाजपेयसर्वप्रतिष्ठाप्तोर्यामादियाजिश्रीनिवासतनूभवस्य श्लेषयमकचक्रवर्तिनः रघुनाथाचार्ययज्वनः तनयेन काञ्चीनगरवास्तव्येन श्रीवेङ्कटाचार्ययज्वना विरचितं राघवयादवीयचरितं सव्याख्यानं संपूर्णम् ॥

रघुनाथसूनुचरितानुवर्णिनी रघुनाथसूरिचरितानुवर्णितः।
इह वेङ्कटार्यकविना सटीकया सहितो समाप्तिमहिताघया कृतिः ॥

जानकीरुक्मिणीरूपा कमला कमलानना।
देवो वा रामकृष्णात्मा दम्पती संपदेऽस्तु नः ॥

॥ श्री सीतारुक्मिणीसमेत श्री रामकृष्णाभ्यां नमः ॥

॥ श्रियै नमः ॥

SRI RAGHAVA-YADAVEEYAM

THE SUBSTANCE OF SLOKAS

1. I pay my obeisance to Lord Sri Rama, who with his heart pining for Sita, travelled across the Sahyadri Hills and returned to Ayodhya after killing Ravana and sported with his consort, Sita, in Ayodhya for a long time.

(Reverse)

I bow to Lord Sri Krishna, whose chest is the sporting resort of Sri Lakshmi; who is fit to be contemplated through penance and sacrifice, who fondles Rukmani and his other consorts and who is worshipped by the Gopikas, and who is decked with jewels radiating splendour.

2. On the earth was the city Ayodhya, named otherwise as Saketa, foremost among the famous cities, was the place of abode of King Dasaratha, son of King Aja, which city was invincible even by the Gods, which displayed the pageantry of the Gods, who had assembled to partake the oblations offered in the sacrifices conducted there, which city was shining with all splendour with the Brahmins and merchant community.

(Reverse)

The city Dwaravathi, noteworthy among the cities, was in the midst of water, that city which

abounded in horses and elephants, which was the battle ground of the debating erudite scholars, which city had as her master, Sri Krishna, whose consort was Radha and which city was the greatest of the seats of learning.

3. The city of Ayodhya abounded in huge mansions, which were the repository of immense wealth and splendour, deep wells and the cooing sounds of the Sarasa birds. The city was full of people, who were filled with a deep sense of love and affection.

(*Reverse*)

The raised pials in the houses of Dwaraka were filled with Brahmins. There were many huge lotuses and impeccable mansions. The City 'Dwaraka' which was indescribable, was in the midst of mango groves.

4. Ayodhya, interspersed with clusters of trees and mansions, had not seen the light of stars. It was full of festivities and joy. It warded off all sins. In its splendour, it equalled the Sun. The majestic lustre in the form of Rama pervaded its whole atmosphere.

(*Reverse*)

The liberal hearted Sri Krishna, the Lord of the Yadavas, the source of all light, the Lord of cows, the repository of unbounded splendour, was the protector of Dwaraka.

5. The great Sage Viswamitra, son of Gadhi, desirous of unfettered performance of sacrifices,

secured the aid of the protector of sacrifices (viz: the calm and famous Sri Rama) from the destructive elements.

(*Reverse*)

The famous sage Narada, the greatest among the Brahmins, and who instils a sense of courage among the warriors and who is a great musician approaches singing, Sri Krishna, who is born for the welfare of the mankind and the world.

6. Sita, whose words are a source of immense joy, who is equal to Mother Earth, who is compassionate to those who bow before her, who was born out of the earth, obtained (married) Sri Rama, who was possessing a graceful splendour and was the consort of Lakshmi, and had taken the human form.

(*Reverse*)

Lakshmi, born as the daughter of a king, was married to Sri Krishna. Rukmani (Goddess Lakshmi in the human form), who is the protector of the Gods, and who is free from all faults and the bride of Sri Krishna, took the resplendent flower Parijatha from Sri Krishna, given by the Sage Narada.

7. Sri Rama, who was glowing with a lustre like that of the Sun, but at the same time was easily approachable, who always sympathised with the woebegotten, who vanquished the demons harassing the sages, who was endowed with all the wealth, became kind-hearted when Parasurama, son of Renuka, bowed before him.

(*Reverse*)

Rukmani had lost all flair for the flowers growing on the earth, which produced a faint pleasure. Rukmani, with that Parijatha flower obtained while on the Raivathaka mountain, was glowing with a new lustre in the company of Sri Krishna, as if she had assumed a new body.

8. Sri Rama, who quickly sapped the energy of Asuras (demons), who was the abode of safety, sported with Sita in the abodes in Ayodhya.

(*Reverse*)

Rukmani who possessed the Parijatha flower, which was like a necklace of pearls, and a repository of all welfare, and who was not afraid of her co-wives, reached her abode with Sri Krishna.

9. In this Ayodhya, the earth (kingdom) was secured for her son (Bharata) by the middle (second of the three) queen, the jealous Kaikeyi.

(*Reverse*)

Satyabhama, the slender hipped, who attained a glorified position with her richness of wealth, became quickly possessed with anger and fear (due to the Parijatha given by Sri Krishna to Rukmani).

10. Kaikeyi, who became emaciated due to sorrow at the thought of coronation and who had lost all pleasures and had ceased to attend on the comforts of the old King Dasaratha, objected to the coronation of Rama and made Rama proceed to the forest.

(*Reverse*)

Satyabhama, who was exceedingly agitated, had bolted the doors to prevent entry of her maids into her abode, where the peacocks used to live and sport. The beautiful-faced Satyabhama was under the influence of grave anger, which was like the forest fire.

11. The glorious and courageous Rama, with great devotion to his revered father, who felt ashamed at discarding the valued truth, (Dasaratha's predicament in fulfilling his vow to Kaikeyi, resulting in the banishment of his beloved son to the forest) started to go to the forest, bereft of all adornments.

(*Reverse*)

In Dwaraka, the brave Krishna, who was attached to his wife, endowed with a flair for music, who had been ashamed by his own action (of giving the flower to Rukmani) approached as if with fear the abode of Satyabhama.

12. Sita, the daughter of Mother Earth, who bestows the gift of faultless knowledge of Sastras, to those who resort to her aid, became ashamed and agitated and entered the forest with great anger. Yet she did not lack lustre.

(*Reverse*)

The resplendent Krishna, the protector and bestower of wealth, who had the celestial bird (Garuda) as his carrier, was not even looked at by

Satyabhama, who was slighted by Krishna's fault (of giving the flower to Rukmani).

13. Sri Rama, who vanquished the horde of wicked, proud and impassioned enemies, got tired while walking through the forest and approached the self-controlled Sage Bharadwaja.

(*Reverse*)

Satyabhama did not utter a word to Sri Krishna out of anger nor did she listen to the utterances of Sri Krishna. But Satyabhama became immensely pleased with Sri Krishna when He told her that He would undertake the burden of bringing the great Parijatha tree and started to converse with Him.

14. Sri Rama who had valorous splendour like the Kubera and who had the distinction of vanquishing the big array of demons (Rakshasas), with his faultless gait, reached the region known as Chitrakuta, which was like the heaven, where the cool breeze was being wafted along.

(*Reverse*)

The cloud hued Sri Krishna, as an atonement to the displeasure caused to Satyabhama, started on a pilgrimage to the 'Swarga'—the heavenly abode of the God, which possessed an auditorium adorned by Rambha and others, to bring the Parijatha tree of divine pleasure.

15. The self-controlled Rama, who had overcome Bhargava Rama (Parsurama) the destroyer of the big line of Kshatriyas, reached the Dandaka

forest. Rama, the Lord attainable only by the Nitya Suris, by having taken the human form also became attainable to the ordinary mortals of the world.

(*Reverse*)

The great leader, the possessor of remarkable magnificence, Sri Krishna, reached the Nandavana - the celestial garden, which gave supreme pleasure to Indra.

16. The faultless Rama, the enemy of ignorance, wearing the dress of bark, killed Viradha, the tormentor of all beings. Then Sri Rama went to Sage Agastya, whose voice was resounding with the Vedic hymns.

(*Reverse*)

Indra, the bestower of water to the earth and who was enjoying the pleasure of hearing different kinds of music and who possessed valour capable of vanquishing the asura (demon) named 'Jambha', got frightened on hearing the news of arrival of Sri Krishna in the Swarga.

17. Sri Rama, the protector of the sages immersed in the lore of the Vedas, was adored by Jatayu. Sri Rama was then implored by Surpanaka, the ugly sister of Ravana for his union.

(*Reverse*)

Lord Sri Krishna uprooted the Parijatha tree on Indra's refusal to part with it. Consequently, Indra, though a friend of Krishna, made up his mind to fight with Him.

18. Lakshmana, the lieutenant and aid of Sri Rama, and the dauntless, cut the nose of Surpanaka. The demonic Surpanaka, who had lost her nose, vowed vengeance on Rama, the descendant of the God Sun.

(*Reverse*)

Indra, who overwhelmed the Asuras, and who was surrounded by the Gods and who had smothered the mountains, and who had his splendour and valour slighted, addressed Sri Krishna with polite words.

19. Though Sri Rama destroyed the demon 'Khara' and his army after a bitter fight, he was unostentatious and remained unscathed. His fame spread far and wide (reached the farthest corners of the earth and the heaven.)

(*Reverse*)

'Oh! Sri Krishna! Possessor of prowess capable of destroying the valour of the Gods, You who have celestial bird (Garuda) as your conveyance; dispenser of wealth, please do not carry the celestial tree Parijatha to the earth.'

20. Ravana, the Lord of Lanka, who was surrounded by Rakshasas, the wicked and mean, made up his mind to conquer Sri Rama, who had destroyed the horde of demons.

(*Reverse*)

Indra, the Lord of the Gandharvas and who was shining just like the God Sun, became afflicted with

sorrow—the sorrow, which has the sickening effect of blunting the sense of discretion—and ordered the capture of Sri Krishna.

21. Sri Rama, the utterance of whose name makes one rid of all sins, shone brilliantly by killing Maricha, the son of Tataka. Sita, without her Lord, lost her composure and became protectorless (destitute).

(*Reverse*)

Indra, who could destroy the wings of the mountains and could overcome Pradyumna, with the rain of his arrows, could not follow Sri Krishna, who accompanied by Pradumna, was wandering around the abode of Gods, the Swarga.

22. The adorable Vaidehi (Sita), who was an incarnation of Goddess Lakshmi, was carried away by the deceitful and mean-minded Ravana.

(*Reverse*)

Pradyumna was defeated by Indra, who was desirous of protecting the frightened and fleeing Gods and who was aided by the Brahmin named Pravara. (Pradyumna fell down unconscious.)

23. Sri Rama, who was shining like the beautiful cloud, and who was separated from his wife, was met by the faultless son of Vayu—Sri Hanuman. The consort of Ruma, Sugriva, who had lost his power and fame and had thereby lost all his happiness, met Sri Rama.

(*Reverse*)

The youthful Pradyumna, who was overcome by the Gods, regained his conscience as the cold breeze blew over him and became his active self. He struck at the enemies and vanquished them and became praiseworthy.

24. The lotus-eyed Sri Rama, whose splendour was adored by the splendour of God Sun, killed Vali, the son of Indra.

(*Reverse*)

Sri Krishna, who had belittled the splendour of Sun with his own splendour, and who had slighted the prowess of Iswara, protected Garuda, his devotee, who with the breeze born out of his wings, was wreaking havoc on the enemies.

25. In Sri Rama was born a new kind of magnificent splendour, which derived its strength from the invincible army provided by Sugriva. The glorious victory (Jaya Lakshmi) which presaged cutting off the head of Ravana, came to Sri Rama.

(*Reverse*)

Sri Krishna, who was capable of enduring the onslaught of an array of missiles, was approached by victory (Jaya Lakshmi), who had natural splendour of her own and had vanquished the Gods. (Sri Krishna defeated the Gods in the battle.)

26. Sri Rama, the renowned protector whose valour had excelled the valour of Indra, and who did not tolerate the glory of the Asuras met the famed

Sri Hanuman, who had crossed the ocean, and shone brightly as he reached the Sahyadri and the shore of the ocean.

(*Reverse*)

Sri Krishna, who was much pained at the attack directed by Indra towards Pradyumna, gained victory and secured the Parijatha tree, the pride of the abode of Gods - Swarga.

27. Sri Rama glowed brightly protecting the army of the valorous monkeys, which was treading its path on the newly built bridge across the ocean, which presented an obstacle in the form of vast sheet of water and with innumerable creatures under water.

(*Reverse*)

A man who praises Sri Krishna is blessed with the power to defeat the enemies. He who does not praise Sri Krishna not only becomes possessed with defeat but also loses all his lustre. Sri Krishna, got hold of the Parijatha tree,

28. Sri Rama who dealt a fatal blow to the adventurous and valorous Ravana, the Lord of Lanka, secured his consort Sita, the daughter of Mother Earth; Sri Rama, who warded off the sorrow of Vibhishana, was adored by all the Gods.

(*Reverse*)

With the welfare of Pradyumna, who struck at the Gods, in view, Sri Krishna very quickly shattered the

foes in the Swarga, which boasted of Iravatha (the elephant). The victorious Krishna thus merited the praise and returned to the earth.

29. The City of Ayodhya became the fitting abode of Sri Rama the opponent of Ravana, with its magnificent and attractive mansions surrounded by cocoanut trees.

(*Reverse*)

The best city of Dwaraka, the abode of victorious elephants, glowed with the divine tree Parijatha and Sri Krishna, who disported with the Gopis in the full moon-lit nights.

30. The lotus-seated Lakshmi entered the opulent and bright city of Ayodhya. The victor (of foes) Rama acquired the great wealth of Kingdom.

(*Reverse*)

The Parijatha with the unfading flowers found a foothold in the threshold of Satyabhama. With the lustre shed by the divine flower, Satyabhama, appeared to shine more brightly, and pleased with the celestial gift, she sported with Lord Sri Krishna.

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥

Bhaiwari's Sadhana Mahavidyalaya ★ Bharatiya Vidya Bhawan
594

Hindi Prachar Press, Madras-17.

Bhaawan's Sri Sankaracharya
Bharatiya Vidya
Vidyalaya

Ill. Mah.

LIFCO'S IDEAL GIFT-BOOKS

FOR ALL FESTIVE OCCASIONS

1 LIFCO'S THE GOOD-DAY GIFT

Piety and Selflessness — Health — Marriage — Family — Upbringing and Care of Child — Birth Control — Income & Expenditure — Ways of Making Life Fuller and Happier — Household Hints — Practical Hints for the Conduct of Social Functions — Gifts that are a Real Blessing — Tears : in a New Light — Worry, the Worst Enemy of Mankind — Contentment or "My Mind to Me a Kingdom is" — Spiritual Enrichment — On Festivals — On Religion — On Prayer and Bhakthi — Honour Thy Father, and Mother, Teachers and Elders — 64 Practical Hints for Everyday Life — Sage Counsels from Intellectuals — Laws of our Country — Mottoes for the Home — Etc., Etc.

One must feel proud to present, or receive this book, as a gift so that its contents which are vital, valid and beautifully beneficial as much to heart as to head will enable the reader to ever strive to scatter light and sweetness and to promote the happiness of the greatest number.

7½" x 5", 494 pp., hard covers with a four-colour art paper jacket. Profusely illustrated.

Price Rs. 7 : By Post Rs. 8.20

2 LIFCO'S **SRIMAD RAMAYANAM & ALL ROUND SUCCESS** (with Prayers of Ramayana Deities) — The Sargas for Parayanam in Samskrit and Hints Etc. in English — 572 pp. — Rs 9.00; By Post Rs. 10.60.

3 LIFCO'S **THE RAMAYANA IN HUNDRED LETTERS** — The Story of Sri Rama in the Form of Simple Letters — 408 pp. — Rs. 7.75; By Post Rs. 9.00.

4 LIFCO'S **CHITRA-RAMAYANAM** — The Story of Sri Rama in Words & Pictures — 124 pp — Rs. 3.80; By Post Rs. 4.80.

PUBLISHERS :

THE LITTLE FLOWER CO.

T. NAGAR : : MADRAS-17

Also at Railway Bookstalls and at Booksellers' in All Big Towns throughout India.